अगस्त–सितम्बर २०२१

श्रावण–कृष्ण–नवमीतः भद्रपद–कृष्ण–नवमी–पर्यन्तम्

(वै–२०७८)

RNI
DELSAN/2013/50379

ISSN:2347-1565

# संस्कृत–चन्द्रिका

## मासिकी संस्कृत–बालपत्रिका

वर्षम्–९ संयुक्ताङ्कः–१–२



सम्पादकः
डॉ. अरुण कुमार झा
सचिवः

एक साहित्यिक त्रैमासिक पत्रिका

एवं

समकालीन साहित्य के रचनात्मक मूल्यांकन की जीवन्त प्रस्तुति

तथा

सम्पूर्ण देश के प्रसिद्ध साहित्य-साधकों के साथ-साथ नवोदित प्रतिभाओं की सशक्त लेखनी की संयुक्त प्रस्तुति

# "संस्कृत मञ्जरी"

(आई.एस.एस.एन-2278-8360)

संस्कृत भाषा और साहित्य के प्रचार-प्रसार हेतु सतत प्रयत्नशील दिल्ली संस्कृत अकादमी, दिल्ली सरकार द्वारा प्रकाशित एक ऐसी सम्पूर्ण साहित्यिक पत्रिका जो सहज मानवीय संवदेनाओं, शोध-निबन्धों तथा उदात्त जीवन-मूल्यों का अनूठा संगम और प्रत्येक वर्ग के पाठक-समुदाय की अपेक्षा के अनुकूल पठनीय एवं संग्रहणीय है।

मूल्यः- एक प्रति रु. 25/- मात्र, वार्षिक सदस्यता शुल्क रु.100/- मात्र

सुरुचि सम्पन्न स्वस्थ सकारात्मक अभिव्यक्ति की संवाहिका

## "संस्कृत मञ्जरी"

के स्थायी अध्येता बनें।

आज ही अपना वार्षिक सदस्यता शुक्ल नगद, मनिआर्डर अथवा दिल्ली में भुनाये जाने योग्य बैंक ड्राफ्ट दिल्ली संस्कृत अकादमी के नाम से भिजवाकर सदस्यता प्राप्त करें। शुल्क मल्टी सिटी चैक द्वारा भी स्वीकार्य होगा।

पत्र व्यवहार का पता --

सचिव/ सम्पादक, दिल्ली संस्कृत अकादमी, दिल्ली सरकार

प्लाट सं.-५ झण्डेवालान, करोलबाग, नई दिल्ली-११०००५

दूरभाष सं.- ०११-२३६३५५९२, २३६८१८३५

ISSN-2347-1565

मूल्यम्- २५ रूप्यकाणि

# संस्कृत-चन्द्रिका

## 'मासिकी संस्कृत-बाल-पत्रिका'

अगस्त तः सितम्बर
२०२१ पर्यन्तम्

वर्षम्-९ संयुक्ताङ्कः-१-२

(वै0—२०७८)
(श्रावण—कृष्ण—नवमीतः
भद्रपद—कृष्ण—नवमी
पर्यन्तम्)

सम्पादकः
डॉ. अरुण कुमार झा
सचिवः

सहायकसम्पादकः
प्रद्युम्नचन्द्रः

पत्रिका-परामर्शकाः
डॉ. आशुतोषदयाल माथुरः
डॉ. पंकजा घई
डॉ. पूर्वा भारद्वाजः
डॉ. धनञ्जयमणि त्रिपाठी

| क्र.सं. | अनुक्रमणिका | | पृष्ठ-संख्या |
|---|---|---|---|
| १. | सम्पादकीयम् | | III |
| २. | हे प्रभु! | सुरन्जीत गाइनः | १ |
| ३. | महान भारत | ,, | २ |
| ४. | साकेतस्य च राजकुमारः | डॉ. वेणीमाधव शास्त्री | ४ |
| ५. | मातृस्मृति | डॉ. रामकिशोर मिश्रः | ६ |
| ६. | यज्ञ प्रार्थना | श्री प्रहलादः | ७ |
| ७. | एकाकिनः शिशुः | डॉ. हर्षदेवमाधवः | ८ |
| ८. | सद्यस्के अध्ययने अरुचिः | ,, | ९ |
| ९. | भूतस्य शिखा (लघुकथा) | ,, | १४ |
| १०. | वरमेको गुणी पुत्रः (लघुकथा) | श्री पूर्णचन्द्र उपाध्यायः | १८ |
| ११. | पितामहान्वेषणम् (लघुकथा) | प्रो. जयदेव जानी | २४ |
| १२. | आशा एव जीवनम् (लघुकथा) | डॉ.रामकिशोर मिश्रः | २७ |
| १३. | भारत-छोड़ो-आन्दोलनम् | प्रचार-प्रसार-विभागः | २९ |
| १५. | लघुक्षणिका (नाटकम्) | डॉ. भूपेन्द्र कुमार राठौरः | ३३ |
| १६. | राष्ट्रभाषा-संस्कृतम् | आचार्यः मनोज डिमरी | ३४ |
| १७. | व्यावहारिक संस्कृत-शिक्षणम् | ,, | |

दिल्ली संस्कृत अकादमी
(राष्ट्रिय राजधानी क्षेत्रम्, दिल्लीसर्वकारः)
DELHI SANSKRIT ACADEMY
(Govt. of N.C.T. , Delhi)
ई-पत्रिका

## प्रकाशकः

सचिवः

दिल्ली-संस्कृत-अकादमी, दिल्ली-सर्वकारः

प्लॉट सं०-५, झण्डेवालानम्, करोलबागोपनगरम्, नवदेहली-110005

दूरभाषः - 011-23635592, 23637798

## सदस्यताशुल्कम्

प्रति-अङ्कम् : 25 रूप्यकाणि

वार्षिकम् : 250 रूप्यकाणि

ISSN : 2347-1565

©दिल्ली-संस्कृत-अकादमी, दिल्ली-सर्वकारः

©Delhi Sanskrit Academy, Govt. of N.C.T of Delhi

शुल्कप्रदानप्रकारः

बैंकधनादेशः (डी०डी०), डाकधनादेशः (मनिआर्डर) अथवा सी०टी०सी० चैक माध्यमेन (दिल्लीसंस्कृतअकादमीपक्षे)

Mode of payment:
Demand Draft, Money order or by CTC Cheque
( In favour of Delhi Sanskrit Academy)

E-mail Id : sanskritpatrika.dsa@gmail.com
sanskritprakashan.dsa@gmail.com
Website : www.sanskritacademy.delhi.gov.in

# सम्पादकीयम्

अयि सुरवाणीसमुपासका: सहृदया:!

संस्कृतसाहित्ये ज्ञान–विज्ञानयो: भाण्डागारो वर्तते। एतस्य भाण्डागारस्य समृद्धये व्यापकरूपेण संस्कृतवाङ्मये निहितचिन्तनप्रवाहस्य निरन्तरं प्रचाराय प्रसाराय संस्कृतपत्रिकाया: महत्त्वपूर्णं स्थानं विद्यते। लेखक–पाठकयोर्मध्ये पत्रिकैव सेतुर्भवति। लेखकानां पाठकानाञ्च बलेनैव पत्रिका सम्यग्रूपेण सञ्चलति। अतएव अस्या: पत्रिकाया: सम्यक् सञ्चालनाय संवर्द्धनाय च ये उत्कृष्टा: लेखा: प्रदत्ता: ते सर्वेऽपि विद्वांस: धन्यवादार्हा: सन्ति।

गीताजयन्ती
शकाब्द: 1943

भावत्क:
**डॉ. अरुणकुमारझा**
सचिव:

# हे प्रभु!

–सुरन्जीत गाइनः

हे प्रभु नौ
देहि तव भक्तिम्,
धर्म पथं गमनं
देहि तव शक्तिम्।



वयम् केवलं भिक्षां
देहि करुणा अमृतम्,
दुर्लभं तव नित्यं
देहि चरणं शरणम्।

वयं पापं अधमं।
त्वमेव महान उदारम्
प्रेम मयं त्वं
सर्व-वत्सलं सुंदरम्।

*****************************************************************************************

## महान भारत

मम भारत
अति महानम्,
विश्व निवासी
गायन्ति जय गीतम्।

महा पुरुषस्य आविर्भाव
युगे युगे भवति,
स्वामी विवेकानंद
संन्यासी रूपेण रमति।

रवीन्द्रनाथ, सुभाष चंद्र
भारत गौरवम्,
नजरुल राष्ट्रस्य प्राण,
विश्वस्य पुरुषोत्तम्।

पवित्र माता गंगा
भारते बहमानः,
अस्य देशे अवतीर्ण
युगे युगे भगवान

–ग्राम व पो.- साहेवेराबाद, डेकोप
जिला खुलना, बंगलादेशः

# साकेतस्य च राजकुमारः

-डॉ. वेणीमाधवशास्त्री

साकेतस्य च राजकुमारः
सिद्धार्थः स त्वभिनवमारः।
नन्दनमिव तद् रुचिरोपवनं
पश्यति स्म रमणीयवनम्॥१॥

सहसा हंसः पतितः पादं
दयनीयं स श्रुतवान्नादम्
याचन्तं चा दृशा तं त्राणं
पश्यति पश्चात् लग्नं बाणम्॥२॥



द्रवते सहजं मृदुलं हृदयं
दृष्ट्वा तादृश कर्म स विदयं।
मनुते दुःखं हृदये लग्नं
बाणं स्वीये हृदयं भग्नम्॥ ३॥

तत्क्षणमेव तु सदयं दयं सृत्वा
हस्ते कोमलहंसं धृत्वा
अवधानेन च बाणं कृष्यति।
क्षतजेन च तद्हृदयं शुष्यति॥ ४॥

पत्ररसेन चिकित्सां धत्ते
कार्पासेन सुरक्षां कुरुते।
स्वीयपटेन च बन्धं कुरुते
न्यस्यति वे मृदुहंसं मरुते॥ ५॥

पाययते पानीयं वदने
नेतुं वांच्छति स्वीये सदने ।
हन्ता तस्मिन्नेव तु काले
स्वजनः प्राप्तस्तत्राकाले ॥ ६॥

अहं तु शरसन्धानं कृतवान्
हंसं चात्र नु याचितवान्।
अहं तु शूरो बाण विमोक्ता
हंसो ममेति परुषं वक्ता॥
तस्य च वचनं श्रुत्वा परुषं
हासेनैवं वदति स पुरुषम्।
हिंसायाश्चाहिंसा त्वधिका
रक्षा सा सुखजीवन-विधिका॥
हननाद्रक्षणमधिकः पक्षः
बाणेनास्य व्रणितः कक्षः।
पारयसे यदि जीवं दातुं
मारय नो येद् यतसे पातुं॥
श्रुत्वा कोमलवचनं मनः
कृत्वा याचति हंसं पुनः।
नैव शृणोति च पौरुषमत्तः
व्रणितो हंसो नैव स दत्तः॥
आनन्दः खलु तस्य च मित्रं
कलहो मास्त्विति तत्र सुमित्रं।
सुलभोपायैस्तस्य स वक्ता
यत्रोभय-हितमतिरपि सक्ता॥
हंसं स्थापय किञ्चिद्दूरं
उभय तिष्ठतु पुरतोऽदूरं।
एहीति युवां हसं वदतं
हस्तेनापि च सञ्ज्ञां गदतम्॥
इत एवैहीत्येको वदति
इत एवैहीत्येको गदति
पश्यत्येकं रक्षणकारं
सरति च नान्यं मारणकारम्॥



-भामतीवेन्द्रेमार्गम्, साधनकेरी
धारवाडः, कर्नाटक प्रदेशः

# मातृस्मृतिः

-डॉ. रामकिशोर मिश्रः

इह जगति गता मां कुत्र संत्यज्य मातः!
प्रसविनि! निजपुत्रं हर्षताहीनचित्तम्।
स्वजलजनयनर्क्षं पश्य चोन्मील्य नेत्रे,
द्रुतमिममचलायां भोः! पतन्तं गृहाण ॥१॥



मम नयनजविन्दून् गच्छतोऽधः प्रमृज्य,
प्रसविनि! खलु दृष्ट्वा मामुपावेशयच्च।
तव किमहमिदानीं नाऽस्मि पुत्रः स एव?
अह! मम सदनैको मौक्तिकोऽगच्छदेव ॥२॥

त्वयि गृह उषितायां यः सदा द्योतते स्म,
जननि! च स इदानीं द्योतते नैव गेहः।
स्वनयनकमलाभ्यां वीक्ष्य मां हर्षसिस्म
कथमसि विपरीता? नास्मि किं सोऽधुनाऽहम्? ॥३॥

प्रसविनि! भवती भोः मां च शास्तिस्म दद्यात्,
जननिः तव सुदीक्षां सूनवे त्वत्पृथक्कः?
तव विरहपयोधौ छात्रसंघो निमग्नः,
त्वमसि जगति यस्मिन् तत्र तुभ्यं नमोऽस्तु ॥ ४ ॥

अयि जननि! यदाऽहं शैशवे किं निमित्तम्,
अनवरतमभूवं मौनमवलम्ब्य रुष्टः।
तदनु कुपिताचिन्ता क्वासि याता चिराय?
स्वसुतमनसि शान्तिं देहि रुष्टा च मा भूः॥ ५॥

शृणु मम वचनं मे पार्श्वमागच्छ शीघ्रम्,
निजकरकमलाभ्यां मां निजाऽङ्के गृहाण।
जननि! शरदशं मां कुत्र याता विहाय?
विलपति तव पुत्रः क्वासि मातः! नमस्ते ॥ ६॥



हरे! हरे! ब्रह्म! दिवस्पते! हे!
समस्तगीर्वाणगणाः! हरे! हे!
दिवं जनन्या विगतात्मने मे,
प्रशान्तिदानं क्रियतां धरे! हे! ॥ ७॥

-२९५/१४ पट्टीरामपुरम्, खेकड़ा
(बागपत) उत्तरप्रदेशः, २५०१०१

# यज्ञ प्रार्थना

-प्रहलादः

यज्ञरूपः प्रभोऽस्माकं भावोज्वलनं कुर्वतु
हत्वा मे कपटं प्रभो हे! मानसिक-बलं यच्छतु।।
वेदस्य वदाम ऋचः सत्यञ्च खलु दध्महे।
हर्षे लीना धैर्यपूर्वं शोकसिन्धुं नु तराम।।
अश्वमेधादिक ऋचः यज्ञेन परोपकारः स्यात्।
धर्ममर्यादानुगम्य लाभः संसारस्य स्यात्।।
नित्यं श्रद्धाया भक्त्या च यज्ञादि वयं कुर्महे।
रोगपीडित विश्वस्य संतापन् वयं हरामहे।।
भावना नष्टा स्यात् मनसः पापाचाराणाम्।
कामनाः खलु पूर्णाः स्युः यज्ञेन वै मनुष्याणाम्।।
लाभकारी अस्तु यज्ञः प्राणधारिणां कृते।
वायुजलं सर्वत्र स्यात् सुगन्धधारी हे सखे।।
स्वार्थभावः गतोऽस्माकं प्रेमपन्था दीर्घस्स्यात्।
इदन्नममेति सार्थकः प्रत्येकेषु व्यवहारः स्यात्।।
प्रेमरसे तृप्तो भूत्वा वन्दनां वयं कुर्महे।
नाथ! करुणारूपी दानं त्वां वयं याचामहे।।
पूजनीयः प्रभोऽस्माकं भावोज्वलनं कुर्वतु।
हत्वा मे कपटं प्रभो हे! मानसिक बलं यच्छतु।।



-भगवती कालोनी
करनालः (हरियाणा) १३२००१

# एकाकिनः शिशुः (बालगीतम्)

-डॉ. हर्षदेवमाधवः

वदिष्यामि नैवाहं मात्रा।
वदिष्यामि नैवाहं पित्रा।



पालयति मां सदा सेविका।
खादयति मां मुदा सेविका।
स्वापयति मां सदा सेविका।

नैव दृश्यते माता प्रातः।
नैव दृश्यते पिता च प्रातः।
परिचरति मां दिनं सेविका।
मया च वसति दिने सेविका।

धावति माता ननु वृत्यर्थम्।
धावति जनकः निजसेवार्थम्।

भ्राता गच्छति पठितुं शीघ्रम्।
भगिनी गच्छति सखिभिः सार्धम्।
लाडयति मां नहि खलु जननी।
त्यक्त्वा नित्यं गच्छति जननी।

रविवासरे वसन्ति सर्वे।
तदा मोदते हृदयं गेहे।
खादयति माता सस्नेहम्।
खेलयति जनकः सानन्दम्।
प्रतिदिनं आयात् रविवारः।
स्यात् गेहे सार्धं परिवारः।



# * सद्यस्के अध्ययने अरुचिः

सङ्गणके शालायाः त्रस्तः
सङ्गणके कक्ष्यायाः व्यग्रः।
एतत् कीदृशं पठनं मातः।
खेदकरं मे पठनं मातः।



नैव शिक्षकाः, नैव वयस्याः।
परिहासा न, नैव च खेलाः।

दृश्यपटं त्रस्तो हि पठित्वा।
श्रान्ते नेत्रे दृष्ट्वा दृष्ट्वा।
श्रान्तः गृहकार्यं ननु कृत्वा।
पठनार्थं चिन्ता मे बुद्ध्वा।
प्रेषय शीघ्रं मां ननु शालाम्।
मिलितुमिच्छा सर्ववयस्यान्।

सङ्गणकं नितरां निर्जीवम्।
सक्तं करोमि कथं नु चित्तम्?

* सद्यस्क = **Online Education**

# भूतस्य शिखा

-डॉ. हर्षदेवमाधवः

चत्वारः सुहृदः सन्ति। सर्वे वयस्याः रामपुरग्रामे एकस्यां रथ्यायां निवसन्ति। सर्वे एकादशवर्षीयाः। सर्वे शालायां पञ्चम्यां कक्षायाम् एकस्मिन् वर्गे पठन्ति। तेषां नामानि-रमणः, भरतः, छगनः, मगनः। रमणः कृषीवलस्य पुत्रः। भरतः सुवर्णकारस्य पुत्रः। छगनः सुधाकारस्य पुत्रः। मगनः लोहकारस्य पुत्रः। सर्वे भ्रातरः इव सार्धं पठन्ति, खेलन्ति, भ्रमन्ति। सर्वे दुर्ललिताः शालायां छात्राणां नायकाः सन्ति। अवकाशे ते नवानि साहसानि कुर्वन्ति। रमणः बलवान् अस्ति। भरतः बुद्धिमान् अस्ति। छगनः पठने कुशलः अस्ति। मगनः सदा अन्येषां साहाय्यं कर्तुं धावति। सर्वे जनाः तान् रामः, लक्ष्मणः, भरतः, शत्रुघ्नः' इति वदन्ति। परीक्षाकाले छगनः स्वमित्राणि पाठयति। अतः सर्वे उत्तीर्णाः भवन्ति। रमणाय व्यायामः रोचते। भरताय चित्रकला रोचते। छगनाय गणितं रोचते। मगनाय विज्ञानं रोचते।

श्रावणमासः आगतः। शालायां जन्माष्टम्याः लघुकः अवकाशः आसीत्। ग्रामात् बहिः शिवमन्दिरे उत्सवानां कृते मेलापकस्य आयोजनम् अभवत्। चत्त्वारिः मित्राणि मेलापकं गन्तुं व्यचारयन्। तेषां पितरः मेलापके किञ्चित् अपि नवं साहसं कर्तुं निषेधम् अकुर्वन्। ते सर्वे मेलापके भ्रमणम् अकुर्वन्। तत्र क्रीडाचक्राणि भ्रमन्ति स्म। एकः ऐन्द्रजालिकः इन्द्रजालस्य मायां दर्शयति स्म। किन्तु एतान् किशोरान् दृष्ट्वा सः अवदत् , 'किशोराः! यूयं दुर्ललिताः, अहम् इन्द्रजालस्य प्रदर्शनं न करिष्यामि। यूयं मम मायां जानीथ।' चत्वारः किशोराः उपाहारस्य आपणम् अगच्छन्। तत्र मिष्टान्नं खादित्वा सर्वे परस्परं परिहासम् अकुर्वन्। मेलापके एका बालिका प्रभ्रष्टा अभवत्। छगनः ताम् एकस्मिन् कक्षे अपश्यत्। सः बालिकां तस्याः पितृभ्याम् अददात्। बालिकायाः पितरौ तस्मै पारितोषिकं दातुम् इच्छतः स्म। किन्तु छगनः अवदत्, 'महाशय! इदं मम कर्तव्यम्।' बालिकायाः पितरौ तस्मै धन्यवादान् दत्त्वा अगच्छताम् तदा रमणः एकं पुरुषं वानरेण सह खेलां प्रदर्शयन् अपश्यत्। चत्वारः जनसमूहे अतिष्ठन्। किन्तु रमणः विना शब्दं वानरस्य समीपे गत्वा तस्य पुच्छम् आकर्षत्। वानरः सहसा अकूर्दत्। सर्वे जनाः भयभीताः अभवन्। ते चत्वारः उच्चैः अहसन्। मगनः वातगोलान् क्रीत्वा बालेभ्यः अददात्। आपणे एकः आपणिकः जनान् वञ्चयते स्म। अतः भरतः शनैः पृष्ठे गत्वा सिंहनादेन सः तर्जयित्वा तस्य आसनं दूरम् अकरोत्। आपणिकः भयवशात् उपवेष्टुं प्रयत्नम् अकरोत्। किन्तु भरतः तस्य आसनं कक्षम् अनयत्। अतः सः भूमौ अपतत्। इत्थं परिहासं कृत्वा ते शिवमन्दिरम् अगच्छन्। तत्र सर्वे जनाः भूतनाथः जयति, 'शिवः जयति, ॐ नमःशिवाय, भूतनाथमहादेवस्य जयः भवतु, इत्थं उच्चैः जयनादान् कुर्वन्ति स्म। ते दर्शनं कृत्वा दूरे शमीवृक्षस्य तले उपाविशन्। रमणः अपृच्छत्, 'शिवः कस्मात् भूतनाथः अस्ति? कस्मात् तं सर्वे भूतनाथं कथयन्ति?

भरतः प्रत्युत्तरम् अददात् , 'अस्य शिवालयस्य नाम 'भूतनाथमहादेवः' अस्ति ।' छगनः अवदत् , 'न हि, भूतनाथः अर्थात् सर्वेषां प्राणिनां नाथः।' मगनः सहसा अवदत् 'न हि, न हि, शिवः श्मशाने निवसति। तत्र भूतानि प्रेताः, पिशाचाः, डाकिन्यः अपि वसन्ति। एते सर्वे महादेवस्य सेवकाः सन्ति।' तदा रमणः अवदत् , किम् यूयं सर्वे जानन्ति यत् अस्मिन् शमीवृक्षे भूतं निवसति, इति।' छगनः अब्रवीत् , 'अथ किम्। अत्र महाभयानकं, भीषणं भूतं निवसति। अस्माकं ग्रामस्य द्वौ कृषीवलौ भूतम् अपश्यताम्।' रमणः अवदत् , 'अहं भूतं द्रष्टुम् इच्छामि।' सः उच्चैः आक्रोशत् , 'भ्रातः भूत नीचै आगच्छ। वयं त्वां द्रष्टुम् इच्छामः। छगनः अवदत् , 'भोः भूतमहोदय! अहं तुभ्यं मिष्टिकां चाकलेहं च दास्यामि।' मगनः अपि उच्चैः अहसत् यदि तव साहसम् अस्ति तर्हि आगच्छ। यदि त्वम् अस्माकम् आदेशं न श्रोष्यसि तर्हि वयं दण्डेन तव अस्थिभङ्गं करिष्यामः। 'रमणः आक्रोशत्, 'भो वयस्याः भूतानाम् अस्थीनि न भवन्ति। जनः मृत्योः पश्चात् भूतं भवति।' छगनः अवदत् , 'भूतं कदा आगमिष्यति? मम पितामही कथयति यत् , 'भूतं यत् किञ्चित् कार्यं कर्तुं समर्थं भवति।' रमणः सहसा अवदत्, भूतम् अमावास्यां रात्रौ द्वादशवादने नियतम् आगच्छति। अतः वयं भूतं द्रष्टुम् अमावास्याम् अत्र आगमिष्यामः। छगनः उच्चैः अवदत्, भो, भूतमहोदय! त्वां मिलितुं वयम् अमावास्यां रात्रौ आगमिष्यामः। अस्माकं साक्षात्कारः निश्चितः। अधुना त्वम् अस्माकं प्रतीक्षां कुरु। इदानीं वयं साधयामः। 'सर्वे स्वगृहम् आगच्छन्। सर्वेषां पितरः अपृच्छन्,' अपि सर्वे कुशलिनः? किञ्चित् दुर्ललितं कृतं वा? किन्तु सर्वे अवदन् , 'न हि, न हि, मेलापके आनन्दः प्राप्तः।' अमावास्यां रात्रौ चत्वारः किशोराः कृतकनिद्राम् अनाटयन्। सर्वे गृहजनाः अस्वपन्। शनैः शनैः ते द्वादशवादने द्वारम् उदघाटयन्। रमणः एकं लगुडं हस्ते अगृह्णात्। भरतः मोदकान् अगृह्णात्। मगनः एकं कर्तरीम् अगृह्णात्। छगनः हनुमतः प्रतिसराणि अगृह्णात्। सर्वे ग्रामस्य चतुष्के मिलिताः। तैः सह मोनुकुक्कुरः अपि तान् अन्वसरत्। मोनुः चतुर्णां किशोराणां प्रियः। सर्वदा असौ सार्धम् अगच्छत्। सर्वे शमीवृक्षतलम् अगच्छन्। छगनः सर्वेषां कण्ठे प्रतिसरम् अबध्नात्। पञ्चक्षणाः व्यतीताः। सहसा मोनुकुक्कुरः अभषत्। सर्वे सावधानाः अभवन्। शमीवृक्षस्य शाखाः वेगेन अकम्पन्त।



रमणः अब्रवीत्, 'भूतभ्रातः! किं हिन्दोले उपविष्टः त्वम्? वयम् अपि समीरस्य सुखम् अनुभवामः।' भूतम् उलूकध्वनिम् अकरोत्। मगनः अब्रवीत्, 'भूतभ्राता तु उलूकः अस्ति। वयम् उलूकात् भयम् न अनुभवामः। 'भूतं बालकम् इव रोदितुं प्रारभत्। भरतः उच्चैः अहसत्,' अहो! अयं तु शिशुकः। अहं निद्रागीतं गायामि। हे शिशुक! स्वपिहि! मम बालकृष्ण! स्वपिहि।'

भूतं सिंहः भूत्वा महाहुङ्कारम् अकरोत्। तदा भरतः अवदत्, 'अहं सिंहस्य दन्तान् गणयिष्यामि। बहोः कालात् अहं सिंहं न अपश्यम्।'

रमणः अकथयत् , 'अहं तु लगुडेन सिंहस्य मस्तकं स्फोटयिष्यामि।'

ततः सिंहः अपि अगच्छत्। चत्वारः किशोराः उच्चैः अहसन्। छगनः अवदत्, 'भूतभ्राता अस्मद्भ्यः बिभेति। अतः असौ नवानि नवानि रूपाणि धारयति।'

ततः सहसा वृक्षात् एकं सिंहासनं भुवि पतितम्। भरतः अब्रवीत् , 'अहो! सिंहासनम् आगतम्।' अतः राजा अपि आगमिष्यति। तस्मिन् क्षणे महान् शब्दः अभवत्। एकम् अस्थिपञ्चरं सिंहासने उपाविशत्। तद् दृष्ट्वा चत्वारः उच्चैः अहसन्।

भरतः अवदत् , अहो ! भूतभ्राता अतीव दुर्बलः। छगनः अपि अकथयत्, तस्य माता तं भोजनं न ददाति।

मगनः हास्येन सह अवदत्, 'भूतभ्राता दरिद्रः अस्ति।' भूतम् अहास्यं कृत्वा अवदत्, 'अहं दरिद्रः नास्मि। पश्यत, अहं भोजनम् आनयामि।' तदा भोजनस्य पात्राणि आगतानि। अत्र रोटिकाः, पर्पटाः, ओदनं, दलं, शाकः-एतत् सर्वम् आसीत्।

रमणः अवदत्, 'भूतभ्रातः! यदि तव समीपे सर्वम् अस्ति तथापि त्वं न खादसि तर्हि, त्वं मूर्खः असि ।'

भरतः अवदत्, 'तव समीपे मोदकाः न सन्ति। मम समीपे मोदकाः सन्ति। किन्तु अहं तु ब्राह्मणाय एव मोदकं ददामि।'



भूतम् अवदत्, 'अहं सत्यम् एव ब्राह्मणः। पश्यत।'

भूतं ब्राह्मणः भूत्वा सिंहासने उपाविशत्।

भरतः अवदत्, 'तर्हि त्वं मम मोदकान् गृहाण।'

भरतः तस्मै मोदकानां पात्रम् अददात्। भूतं मस्तकं नामयित्वा मोदकान् अखादत्। तदा तस्य पृष्ठे गत्वा मगनः कर्तर्या भूतस्य शिखाम् अकर्तयत्। मगनः उच्चैः विहस्य अवदत्, 'अधुना भूतमहोदय! त्वम् अस्माकं सेवकः असि। तव शिखा मम समीपे वर्तते। अस्माकं सेवां कुरु ।'

भूतं स्वशिरः अस्पृशत्। अपि च स्वशिखां मगनस्य हस्ते अपश्यत्। अतः भूतम् उच्चैः रोदनम् अकरोत्। छगनः तस्मै जलम् अददात्। भूतं दीनं भूत्वा अवदत्, 'हे शूराः किशोराः! यूयं सर्वे साहसिकाः। यूयं बुद्धिमन्तः। अहं युष्माकं सेवकः। किन्तु यूयं कस्मात् मत्तः न विभीथ?' रमणः अहसत्, 'भ्रातः! वयं सर्वे हनुमतः भक्ताः। अतः वयं भयं न जानीमः। वयम् असत्यात् बिभीमः। अधर्मात् एव बिभीमः। पश्य, अस्माकं समीपे हनुमतः प्रतिसराणि सन्ति।'

भूतम् अहसत् , अतः एव यूयं सर्वे सुरक्षिताः सन्ति। तथापि यूयं निर्भयाः स्थ। ये निर्भयाः सन्ति, तान् तेषां किञ्चित् अपि कर्तुम् अहं न शक्तिमान्। अहं स्वयम् एव भूतयोनौ न आगतः। अहं पापं कृतवान्। अतः अहं पापयोनिं लब्धवान्। 'छगनः अपृच्छत्, भ्रातः! त्वं कीदृशानि पापानि अकरोः?' 'कथयामि' भूतम् अवदत् , 'किन्तु यूयं मां भ्रातरं कस्मात् मन्यध्वे?' भरतः अवदत्, 'अस्माकं मातरः वदन्ति यत् बान्धवाः शिवभक्ताः च स्वदेशः भुवनत्रयम्। 'त्वम् अपि भूतम् असि। भगवतः शिवस्य भूतप्रेताः प्रियाः सन्ति ।'

भूतम् अवदत् , 'साधु भ्रातर:! अहं ब्राह्मण: आसम्। किन्तु अहं सन्ततिं न आप्नवम्। अत: मोहवशात् अहं एकस्या ब्राह्मण्या: शिशो: अपहरणम् अकरवम्। सा ब्राह्मणी पुत्रवियोगेन अतीव दु:खिता अभवत्। अहं शिशुं प्रत्यर्पितवान्। किन्तु तस्मात् पापात् अहं भूतनाथ: अभवम्। कथयत, किं युष्माकं प्रियं करोमि?' छगन: शीघ्रम् अवदत्, 'भ्रात:! वयम् अत्र रात्रौ आगता:। वयं चलितुम् अपि न शक्ता:। त्वम् अस्माकं कृते मिष्टान्नम् आनय। अस्माकं चरणानां संवाहनं च कुरु। तव नाम किम्?'

भूतं प्रत्युदतरत्, 'मम नाम महाकाल:। युष्माकं कृते मिष्टान्नम् आनयामि। मम समीपे पञ्चविंशतिसेवका: सन्ति।' पञ्चक्षणानन्तरं महाकाल: मिष्टान्नम् आनयत्। सर्वे मिष्टान्नम् अखादन्। महाकाल: सर्वेषां पादानां संवाहनम् अकरोत्। तत: स: अपृच्छत् इदानीं युष्माकं किं प्रियं करोमि? 'रमण: अवदत् ,'अस्माकं ग्रामे सरोवर: नास्ति। अत: जलस्य अभाव: अस्ति। त्वं ग्रामात् बहि: सरोवरं रचय।'

भरत: अवदत्, 'अपि च अस्माकं शालां परित: पञ्चाशत् वृक्षाणाम् आरोपणं कुरु।' छगन: अवदत् , 'शालाया: समीपे आम्रवृक्षान् प्ररोहय। मह्यम् अपक्वानि आम्रफलानि रोचन्ते।'

मगन: अवदत्, अपि च ग्रामस्य मार्गान् अपि च समीचीनान् कुरु। सर्वत्र गर्ता: वर्तन्ते।'

रमण: अवदत्, 'अपि किं करिष्यसि एतत् सर्वम्?' महाकाल: अवदत्, 'एतत् सर्वं करिष्यामि। किन्तु प्रात: कालस्य पश्चात् अहं किञ्चित् अपि कर्तुं न समर्थ: ।'

रमण: अवदत्, 'त्वं एतानि कार्याणि कृत्वा आगच्छ! वयम् अत्र तव प्रतीक्षां कुर्म:। 'महाकाल: अगच्छत्। स: कार्यं कृत्वा आगच्छत्। स: श्रान्त: आसीत् ।

महाकाल: अवदत् , भ्रातर! मम सेवकै: सह अहं सर्वाणि कार्याणि अकरवम्। किन्तु अधुना मां मा तर्जयत। अपि किञ्चित् कार्यम् अवशिष्टम् अस्ति वा?'

भरत: अवदत्, त्वम् अस्माकं ग्रामं त्यक्त्वा गच्छ।'

महाकाल: अवदत्, 'भ्रातर: युष्माकं समीपे मम शिखा अस्ति। अत: अहं कुत्र अपि गमनं कर्तुं न समर्थ:।'

छगन: अवदत् , 'तर्हि त्वं तव मोक्षस्य उपायं वद।'

महाकाल: अवदत् , 'यदि यूयं शिवमन्दिरं गत्वा मम शिखां तत्र संस्थाप्य वदिष्यथ, 'हे महादेव! महाकालं भूतयोने: मोचय' इति, तर्हि अहं भूतयोने: मुक्त: भविष्यामि। किन्तु किं यूयं युष्माकं कृते किमपि न इच्छथ? किम् अहं युष्माकं गुप्तं धनम् आनयानि?'



मगनः अवदत् ,'न हि, वयं श्रमिकानां पुत्राः। वयम् अपि श्रमं कृत्वा धनम् अर्जिष्यामः। विना श्रमं प्राप्तं धनं भोगविलासेन जीवनं नष्टं करोति। धन्यवादाः। किन्तु वयं साहसप्रियाः। अतः एव इदं साहसं कृत्वा ग्रामस्य श्रेयः अकुर्म। वयं तव मोक्षाय शिवमन्दिरं गत्वा प्रार्थनां करिष्यामः।

चत्वारः किशोराः अवदन्, 'वयं त्वां मुक्तं करिष्यामः ।' छगनः अवदत् , 'किन्तु पुनः कुकार्यं मा कुरु।' महाकालः अवदत्, 'नहि नहि, यूयं सर्वे परोपकारिणः। अहम् अपि अधुना पापं त्यजामि। मां मुक्तं कुर्वन्तु।'

सर्वे किशोराः 'तथास्तु' इति उक्तवा ग्रामे स्वगृहम् अगच्छन्। अपरेयुः ग्रामजनाः ग्रामात् बहिः सरोवरं दृष्ट्वा आश्चर्यचकिताः अभवन्। तदा सर्वे ग्रामस्य मार्गान् सुव्यवस्थितान् अपश्यन्। शालायाः शिक्षकाः छात्राः च शालां परितः वृक्षान् अपश्यन्। सर्वे एतत् सर्वं कथम् अभवत् , 'कः अकार्षीत् , कस्मात् सहसा एतत् सर्वम् अभूत् ' -इति परस्परम् अपृच्छन् ।

ग्रामस्य प्रतिचतुष्कं सर्वे मिथः अपृच्छन्। केचित् अवदन् यत् 'एतत् सर्वं शिवस्य वरदानेन अभवत्' इति। केचित् अवदन् यत् 'कोऽपि ऐन्द्रजालिकः रात्रौ एतत् सर्वम् अकरोत्' इति। कोऽपि अवदत् यत् 'ग्रामपञ्चायतेन एतत् सर्वं कृतम्' इति। कोऽपि प्रश्नानां समाधानं न आप्राप्नोत्।

चत्वारः किशोराः आम्रवृक्षस्य शाखाम् आरुह्य परिहासम् कुर्वन्ति। ते कथयन्ति यत् 'ग्रामजनानां पुण्यैः एतत् सर्वम् अभवत्।' इति।

पुनरपि नवसाहसं कर्तुं विचारयन्ति अधुना ।।



**-८- राजतिलक बंगलोजः**
**आबादनगरम्, बोपल, अहमदाबादम्,**
**गुजरात प्रदेशः**

# वरमेको गुणीपुत्रः

**–डॉ. पूर्णचन्द्र उपाध्यायः**

कालोऽसौ इदानीं कस्यचित्परिपुष्टावयवस्योत्साहिनः युवकस्येव वर्षर्तोः निर्भरः प्रसरणमुखरः सकलप्राणिचैतन्यावबोधकः हृदयसमुल्लासकश्च। ऋतावस्मिन् न केवलम् आबालवृद्धवनीतायुवानः मानवाः अपितु कीटपतङ्गपशुपक्षिभ्य आरभ्य वनस्पतयोऽपि प्रमुदिताः सन्तः अर्पयन्ति कार्तज्ञ्यशतं प्रकृत्यै। परन्तु सृष्टिरेषा विचित्रा विचित्रं च विधेर्विधानम्। तदिदं विश्वजनीनं सत्यं सार्थकीकुर्वन्ती प्रसरति निरवच्छिन्नतया कालस्य कुटिला गतिः। मोदायमानस्यास्य वर्षाकालस्य कश्चन दिनमुखावसरः, आरोहावरोहक्रमेण 'रिमझिम' इति श्रुतिपेयं ध्वनिं कुर्वाणा वृष्टेः धारा विकिरति भूमौ मौक्तिकशतान्। तदुपरि च क्वचित् कादाचित्कतया नभसः कोणैकदेशादाविर्भूतबालदिवाकरस्य स्वर्णाभक्षीणकिरणाः मणिमाणिक्यसंहतिमापादयन्ति। एकतश्च बलाहकततिभिः कृष्णायितगगनस्याधस्तात् नयनामोदका श्वेतबलाकापंक्तिः पयोधितरङ्गप्रसृतडिण्डिभराजिरिव अत्यन्तं रमणीया एव।



परन्तु निराभरणशरीरस्येवाल्पीयसैव वस्तुजातेन संश्लिष्टस्याल्पेतरदिनेभ्य अप्रसाधितस्य च सुजीर्णस्य ग्रामैकपार्श्ववर्त्तिनः कुटीरस्यान्तः एकस्मिन् कोणे वातायनं निकषा समासीनः निर्धनतासूचकं मलिनं स्फुटितं च परिधानम् आदधानः समुच्छ्वसितश्वासः करुणनयनः हासविरहितः दयनीयभावापन्नः गवाक्षमार्गेण सुदूरं दिग्वलयं निर्निमेषं वीक्षमाणः सप्तवर्षीय अबोधबालः सुबोधः हृदयस्यान्तः चिन्तानिमज्जितः। समक्षमेव तस्य वाष्पायितमुष्णपेयं चायमिति पयोहीनं कृष्णवर्णकमवहेलितप्रायः चषकान्तः वर्त्ति तत्पानकालमपेक्षमाणमिव। परन्तु न तत्र तदीया दृष्टिः, न च तस्मिन् तदीया रुचिः। न केवलं चायपाने अपि तु भोजने शयने वा जागरणे सर्वत्रैव निष्कारणनिस्पृहता तदीया प्रबला। समय इदानीं पूर्वाह्णे सप्तवादनम्। आप्रत्यूषात्सम्पादितगृहकार्यविरता माता तदीया परगृहसेवाकार्यसम्पादनार्थं जिगमिषया त्वरमाणा शब्दापितवती स्वकीयपुत्ररत्नमद्वितीयं सुबोधम्, 'नयनमणे! चायं पिब शीघ्रम्, नोचेदिदमुपयाति अनुष्णताम्, अपि च कालान्तरे वस्त्रपुटे संस्थापिता रोटिकाः सेवस्व पलाण्डुना साकम्। द्वारमधुना आवृणु मद्गमनात्परम्। मातुः शब्दततिमाकर्ण्य चकितचकितः बालः सुबोधः तन्मुखस्य पुरः ' मातः!............... इत्युचार्य तुष्णीमन्वगच्छत्, केवलं समुद्घाटितनेत्राभ्याम् अपश्यत्। तमधिगम्य माता सुलोचना तन्मस्तके कराङ्गुलिसंवाहनपूर्वकमपृच्छत्, 'किं रे तात! वक्तुकामोऽसि किमपि? निर्द्वन्दं वद, किं तावत्तथ्यं आलोड्यते ते मनसि? 'किञ्चिद् विरम्य अवोचत् सुबोधः, मातः! पश्याम्यहं प्रतिदिनं प्रातः मादृशाः लघु-लघुबालाः स्कन्धेषु स्यूतान् आलम्ब्य प्रसन्नचेतसा अस्मत्कुटीरस्य पुरस्तादेव प्रयान्ति विद्यालयम्। एतान् दृष्ट्वा मनसि मे महती जिज्ञासा। किमहं न गच्छेयम् विद्यालयं तैः साकम्? किमर्थं मां न प्रेषयसि? किं वा पितृहीनानां बालानां तत्र विद्यालये प्रवेशो वर्जितः? किमस्माकं समाजे एतादृशी विषमता? मनो मे

बहुधा व्याकुलायते एतत्सर्वं समीक्ष्य। अहमपि पिपठिषामि मात:।' इति। स्वहृदयण्डस्य तनयस्य निश्छलां मनोभावाभिव्यक्तिं श्रुत्वा सुनयना स्वनेत्रजलं मार्जयन्ती किञ्चिद् विमलितान्त: करणा अवोचत, 'न हि रे तात ! एवं न। पिता ते आसीत् सुशिक्षित:, अपि च स्वपित्रोरसौ कनीयान् चतुर्षु सहोदरेषु, परन्तु बुद्धिमत्तायां विशेषतया अध्ययने स आसीत् सर्वोत्तम:। स्नातकोत्तरकलापरीक्षायामसौ आसीत् प्रप्रथम: विश्वविद्यालयीन: स्वर्णपदकविजेता च। शासकीयसेवायाम् उच्चमाध्यमिकशिक्षकत्वेन चयनमपि तस्य जातम्। परन्तु कार्यग्रहणात्पूर्वमेव दुर्दिनं तन्नाहं विस्मरामि। तदानीं द्विमासमात्रायुस्त्वं मदुदरे संवर्धमान: आसी:। पिता ते कामयते स्म यत्त्वमुच्चशिक्षितो भूत्वा भविष्यति कश्चित् प्रशासनिकोऽधिकारी इति। परन्तु दैवहतकेन किं वा नैव आचरितम्? सर्वस्वं नो व्यपहृतम्। असाध्येन केनचिदज्ञातरोगेण पिता ते कालकवलितोऽभूत्। तदारभ्य विपत्तिर्महती समापतिता आवयोरुपरि सज्ञातिकुटुम्बोपेता। पितुस्ते स्वर्गमनात्परं किंचिद्दिनेभ्य अनन्तरं ज्येष्ठपितृभि: पितामहीपितामहाभ्यां च तेऽहं सगर्भा गृहान्निष्कासिता ताडनभर्त्सनपूर्वकम्, भृशमहं क्रोशिता च तै: तदवसरे कुलटा, कुलक्षयिणी, कुलनाशिका, मानुषराक्षसी चेत्यादिभि: श्रुतिकटुभि: शब्दै:। अहमपि कालाहिदंष्टा तस्यामविस्मरणीयकालरात्रौ परित्यजन्ती तद्गृहं नर्कतुल्यं बहुदूरमत्रागत्य परगृहकार्यश्रमपारिश्रमिकात्यल्पसंचयेन कुटीरमिदं निर्मापितवती वसतिजनानां सहयोगेन। अपि च गर्भनिर्भरा यथाकालं त्वामजनयमत्रैव कुटीरे प्रतिवेशिन्या: वृद्धाया: साहाय्येन। इदमेव नो वृत्तमिदानीं यावत् श्रुतं त्वया अतीव करुणम्। श्रुत्वैतत् सर्वमुदन्तमवादीदबोध: सुबोध:, 'नाहं पुन: पठनार्थं कथयिष्ये मात:!' इति। 'अवश्यं त्वं पठिष्यसि रे तात! न केवलं त्वदीया पिपठिषा अपि तु पितुस्ते अन्तिमेच्छा पूरणीया मया इति मे प्रतिज्ञावचनम्। यतोहि परमेश्वरस्य साम्राज्ये विलम्बम् अवश्यं जायते, परन्तु अन्धकारो न भवति, नूनम् एकदा प्रकाशो भविता इति अस्ति मे भगवति विश्वास: सुदृढ:। इत्येतावदुक्त्वा परगृहसेवाकार्यसम्पादनार्थं प्रस्थितवती सत्वरं सुनयना। परगृहकार्यनिरतां विचलिताम् अन्यमनस्कां च तां वीक्ष्य जिज्ञासितवन्तौ गृहस्वामिनी गृहस्वामी च 'किमर्थं मलिना ते मुखच्छाया सुनयने! अपि सर्वं कुशलम्? अपि ते पुत्रस्य स्वास्थ्यं समीचिनम्? नि:सङ्कोचं वद, का ते समस्या?' इति। सर्वं वृत्तं स्वकीयं श्रावितवती सा तयो: पुरस्तात्। श्रुत्वा च तौ शिक्षितदम्पती समाश्वसन्तौ तां वसतिस्थप्रारम्भिकविद्यालये प्रधानाध्यापकेन साकं सम्पर्कं साधयितुम् उपदिष्टवन्तौ। परामर्शेणानेन किंचिदाश्वस्तचेता सा परावृत्य स्वकुटीरं निनाय तद्दिनस्य शिष्टं कालं गृहकर्मणि व्यापृता सती ययौ च शय्यां यथाकालम्। अपरेद्यु: प्रातरुत्थाय त्वरायमाणा सा समाप्य च नित्यकर्म 'चल रे पुत्रक! विद्यालयं प्रति। 'इत्युक्त्वा प्राप्तवती विद्यालयस्थं प्रधानाध्यापकं स्वपुत्रेण साकं सोत्साहं हृदा संकुचितेन। द्वारस्थां संकुचदंगां काञ्चित् सार्भकां बालामवलोक्य तत्कालमेव कक्षस्यान्त: आकारयत् प्रधानाध्यापक:, जिज्ञासितवान् च तदागमनप्रयोजनम्। सुनयनाऽपि एकेनैव दीर्घश्वासेन अभ्यधात् स्वकीयमसहायं दुख:स्थं जीवनवृत्तम्, अपि च स्वतनयगतां शिक्षाधनलिप्साहठम्। तदेतस्या: निराश्रिताया: महिलाया: दुख:स्थं वृत्तमाकर्ण्य पितृहीनबालस्य च दृढां पिपठिषां चावधार्य विगलितान्त:करण: प्रदर्शितसंवेदन: प्रधानाध्यापक: करुणाकर: प्राबोधयत् ताम्, चिन्तया अलम्। यथाकालं यथेप्सितं च ते सेत्स्यति भगवत: दयामयस्य कृपया।



सावधानमनसा एतत् श्रूयतां यद् राजकीयेऽस्मिन् विद्यालये सर्वकारपक्षतः प्राथमिकी शिक्षा निःशुल्कमेव। पुस्तकानि पुस्तिकाश्च निःशुल्क लभ्यन्ते इतः। अतः बालमेनं प्रतिदिनं शिक्षाग्रहणार्थं प्रेषयतु। प्रवेशोऽस्या-स्माभिरिदानीमेव क्रियते। अद्यारभ्य एष अस्मत्पुत्रवदस्मदधीन एव। शास्त्रेष्वपि निगदितमेतद् यत् –

**जनिता चोपनेता च यस्तु विद्यां प्रयच्छति।**
**अन्नदाता भयत्राता पञ्चैते पितरः स्मृताः॥'**

प्रधानाध्यापकस्य मर्मस्पर्शि वचः हृदि निधाय आश्वस्ता सुनयना स्वतनयं तत्रैव विद्यालये सन्त्यज्य मनसा धन्यवादशतं प्रदाय प्रागात् तद्दिवसीयपरगृहसेवाकार्यसम्पादनार्थम्।

एवमेव गुरोः करुणाकरस्य विशुद्धस्नेहसंसिक्तवात्सल्यभावोपेतविशिष्टशिक्षादानेन समेधितदीपाग्निरिव प्रगुणितसकलसंस्कारयुतः सुबोधः यथाकालं मेधावित्वप्रदर्शनपुरस्सरम् उदतरत् प्राथमिकीं शिक्षां तच्छिक्षणानुष्ठानात्। ततश्चालवालप्रपूरितजलसेचनेन समेधितबालपादप इव सुबोधोऽसौ गुरोः करुणाकरस्य सत्परामर्शप्रेरणया सम्प्रेरितः सन् उच्चशिक्षायां दत्तचित्तोऽभूत्। उच्चाङ्कोपलब्धेः कारणादसौ सर्वासु कक्षासु छात्रवृत्तिमुपलभ्य एकस्मिन् समाचारप्रकाशनकार्यालये रात्रिकालीनसेवा-वृत्त्याऽर्थोपार्जनमाध्यमेन च लोकप्रशासनविषयमवलम्ब्य विश्वविद्यालयीनस्वर्णपदकविजेतृरूपेण स्नातकोत्तरपरीक्षामुदतरद् यथाकालम्। अग्रे च पुनः पुनः दिवङ्गतस्य पितुरन्तिमाशापूरणप्रेरणया, दयनीयदशापन्नजनन्याः दुःखनिवारणेषणया, समस्तगुरुजनानां शुभाशंसात्मकप्रेरणया, स्वस्य दृढात्मप्रत्ययेन च सम्प्रेरितोऽसौ भारतीयप्रशासनिकसेवापरीक्षायां प्रथमप्रयासेनैव सर्वोच्चस्थानमलभत्।

देहरादूननगरे प्रशिक्षणात्परं प्रथमनियुक्तिस्तु तस्योपखण्डाधिकारित्वेन कस्मिंश्चित् सुदूरे ग्रामाञ्चलेऽभवत्। तदुपखण्डस्य नाम गुणपुरम् । राजकीयसेवायां कार्यग्रहणस्य प्रथमदिवसे एव असौ मनसा अचिन्तयतद् यद्, 'सामान्यतया सर्वे अर्थप्राप्तिनिमित्तमेव आजीविकासाधनरूपेण वृत्तिं कुर्वन्ति, परन्तु केचन एव विशिष्टाः ये खलु समाजस्य राष्ट्रस्य चोन्नतिविधानमाध्यमेन स्वगुणगौरवं पोषयन्तः समेधयन्ति मातुः मातृभूमेश्च प्रतिष्ठाम्। अतः मया अपि एवं किमपि विशिष्टं विधेयम्, येन मातुः पितुश्च शिरः समुन्नतं स्यात्' इति । उक्तं चात्र हितोपदेशे नारायणपण्डितेन–

**गुणिगणगणनाऽऽरम्भे न पतति कठिनी ससम्भ्रमाद् यस्य ।**
**तेनाऽम्बा यदि सुतिनी, वद बन्ध्या कीदृशी भवति ॥** (हितो. १६)

तदिदमुद्देश्यं सफलीकर्तुं नियुक्तेरनन्तरमेव सुबोधः प्रथमं तावत् प्रतिदिनं ग्रामाद् ग्रामान्तरमटित्वा तत्रत्यां सामाजिकीं शैक्षिकीं च दशां प्रत्यक्षीकृतवान् यत्, तत्र बहुषु ग्रामेषु जनाः प्रारम्भिकशिक्षाया अपि अनभिज्ञाः, येन सामाजिकी दशा अत्यन्तमेव दयनीया। एतत्सर्वं समीक्ष्य सुबोधः कृतसंकल्पः सन् सुनियोजिततया परियोजनादिकं निर्मापितवान् स्वाधीनस्थाधिकारिभिः कर्मचारिभिश्च मिलित्वा। तदनुसारं च समुन्नतसुव्यवस्थितसमधिकप्रारम्भिकशिक्षानुष्ठानानां व्यवस्थापनार्थं सर्वकारीयानुदानस्य प्रावधानमकार-यत्। अपि च तत्र प्रशिक्षितानां सुशिक्षितानां च समर्पितचेतसां युवशिक्षकाणां नियुक्तिमकारयत्। सर्वेषु ग्रामेषु प्रतिगृहं स्वयमेव अधिगम्य निर्धनबालानां सूचीं निर्माय आवश्यकतानुसारम् आर्थिकसहायतायाः

व्यवस्थामप्यकारयत्। तदीयस्वकीयवेतनस्यापि अर्धाधिकोंऽशः पुण्येऽस्मिन् कर्मणि व्ययीभवति स्म। एकेनैव बाणेन लक्षद्वयमधिगतं तेन, एकतः वृत्तिहीनानां यूनां कृते आजीविकासंसाधनोपलब्धिः, अपरतश्च अशिक्षितसमाजस्य समुत्थानम्। सैषा सुनियोजितव्यवस्था तदीयं कार्यकौशलं प्रबन्धननैपुण्यं च प्रकटयति स्म। केषुचिदेव वर्षेषु गुणपुरस्य शैक्षिकीदशागुणसौरभः सर्वत्र प्रसारितोऽभूत्, सामाजिकस्तरश्च समुन्नतिमुपगतः। तदुपखण्डवर्तिनः लोकनायकाः, सामान्यजनाश्च तदुपखण्डाधिकारिणः निःस्वार्थपरं जनहितकारि कृत्यमिदं सम्मानयितुं महता समायोजनेन सुबोधं सभाजयामासुः। क्रमशः सुबोधस्य सत्कर्मप्रसृतोऽयं समाचारः न केवलं राज्यसर्वकारस्य विधानसभायाम्, अपि तु केन्द्रसर्वकारस्य लोकसभायां राज्यसभायां च उभयत्र गुंजितः। परिणामस्वरूपं मन्त्रिपरिषदः सर्वमान्यनिर्णयप्रसृतं पत्रमेकं राष्ट्रपतिभवनात् अधिगतं सुबोधेन यद् राष्ट्रियपर्वणि स्वतन्त्रतासमारोहे राष्ट्रपतिमहोदयैः तत्सम्मानं विधास्यते, अतः तत्स्वीकृतिपत्रप्रेषणपूर्वकम् आहूतोऽसौ। सुबोधेनाऽपि सपणं स्वीकृतिपत्रं राष्ट्रपतिभवनाय प्रेषितं यद् व्यक्तिद्वयेन सह एव तेन सम्मानसमारोहे उपस्थातव्यमिति अनुमतिः प्रार्थनीया इति। यथाकालं ततः तदर्थम् अनुमतिपत्रम् अधिगम्य सुबोधः समारोहस्थलं प्राप्तवान् स्वमात्रा सुनयनया गुरुणा करुणाकरेण च साकम्। पूर्वनिर्धारितकार्यक्रमानुसारं यदा महामहिमराष्ट्रपतिमहोदयैः सम्मानार्थमसौ आकारितः, तदा सुबोधः शब्दद्वयम् अभिधातुं सविनयम् अनुज्ञां स्वीकृत्य दण्डायमानोऽभूत् न्यवेदयच्च राष्ट्रपतिमहोदयेभ्यः, 'महामहिममहोदयाः! मन्निवेदनमिदं यत्, नाहम् एतस्य सम्मानस्य अधिकारी, वस्तुतः सम्मानार्हो एतौ मदीया माता प्रारम्भिकशिक्षागुरुश्च । न केवलं मे आदर्शभूतौ अपि तु सम्पूर्णसमाजस्य राष्ट्रस्य च आदर्शौ, यतोहि एतयोः प्रेरणावारिभिः समेधितः सन् कर्त्तव्यकर्म एव केवलं सम्पादितवान् अस्मि। अतः एतयोः सम्मानेन न केवलमहम् एकाकी अपि तु सम्पूर्णं राष्ट्रं प्रसन्नं प्रमुदितं च स्यादिति। महामहिमराष्ट्रपतिमहोदयैश्च सभासदां सकलजनानां करतलध्वनिनिःसृतानुमोदनं स्वीकुर्वद्भिः तथैव आचरितम् अपि च सुबोधस्यापि सम्माननं यथाकल्पितं विहितम्। प्रसङ्गेऽस्मिन् सूक्तिरियमपि चरितार्थतामुपयाति –



**वरमेको गुणीपुत्रो न च मुर्खतैरपि ।**
**एकश्चन्द्रस्तमो हन्ति न च तारागणैरपि।।** (हितो. १८)

**–संस्कृतविभागाध्यक्षः**
**राजकीयमहाविद्यालयः बून्दी,**
**बून्दी ( राज. )**

# पितामहान्वेषणम्

**-प्रो. जयदेव जानी**

देवराजः पोलीसकार्यालये स्वासने समुपविशति। तदैव तत्र प्रविशन्त्याः शालिन्याः स्वरं स शृणोति। ''आगच्छ। पुत्रि! आगच्छ।'' आगत्य शालिनी देवराजं दर्शयन्ती वदति। ''अयं देवराजमहाशयः। स ते कथां श्रुत्वा यथायोग्यं करिष्यति। महाशय! इयं मम शालाकालीनसख्याः किल्लोलिन्याः पुत्री निष्का। तस्याः पितामहस्याऽन्वेषणमस्माभिः कर्तव्यम्।''

निष्का वदति। ''नमस्ते। महोदय!''

देवराजेन निष्का दृष्टा। सा पीतगौरवर्णाङ्गयष्टिः कृष्णकेशाऽर्धचन्द्रसमललाटा तनुभ्रूः दीर्घासितनेत्रा सुनासा रक्तौष्ठी चिबुकमध्यविराजितखञ्जना कम्बुकण्ठी दीर्घांसा मांसलबाहुयुग्मा रक्तहस्तशोभितन्वङ्ग-लीशोभमाना प्रांशुदेहयष्टिना सकलजनमनोभिरामा धीरगम्भीरस्वरा च विलोकनेनैव सम्मानपदयोग्या वर्तते।

''पितामहस्याऽन्वेषणम् ? पितामहोऽस्या गृहान्निष्कासितो वा स्वयं पलायितो वा?''

''उभयं कारणम्। प्रथमं तावत् तस्याः कथां शृणोतु भवान्।''

''अस्तु। शृणोमि।''

''मम पितामहचरणा जिताशराय-जोशी अहमदाबादनगरे जातः शालाकीयाभ्यासं पारयित्वा वल्लभ-विद्यानगरे कम्प्यूटरविद्यामधिगत्य तत्रैव कार्यकीर्त्तिमारब्धवान्। स्वकक्षायां सहाध्यायिनो विनोदस्य भगिन्या सुहासिन्या विवाहं कृतवान्। प्रारम्भिकस्य स्नेहमयदाम्पत्यलसिते जीवने तयोः शिवेशरायो मम पिता जन्म लब्धवान्। मम पिताऽपि कम्प्यूटरविद्यायां पारतो जातः फ्रान्सदेशे कार्यमधिगतवान्। तत्र मम जनन्या किल्लोलिन्या सहकार्यकारिण्या विवाहो जातः।''

''अहो स्नेहविवाहस्य परम्परा! भवत्यपि किं तादृगेव विचारयति?''

निष्का मोहकस्मितेन किञ्चिदप्यनुक्त्वा स्वकथामग्रेऽवतारयति। ''मम जन्मसमये पितामहः पितामह्या सह फ्रान्सदेशमागतवान्। षण्मासावधि स तत्राऽस्मद्गृहे निवासमकरोत्। षण्मासपर्यन्तं पितामहेन मम लालनं याभिर्लीलाभिर्याभिर्बालक्रीडाभिर्यैः शिशुवाणीकिल्लोलैश्च कृतं तत्सर्वं स्पष्टतया न स्मरामि किन्तु किञ्चित् किञ्चित् स्मृत्वा किञ्चिदस्पष्टानि दृश्यानि चित्तपटले समुद्भवन्ति।''

''निष्के! कीदृश्यो लीलाः ? कास्ताः क्रीडाः ?'' ''शालिनी पृष्टवती।

''मम जन्मसमयो रात्रौ सार्धत्रयवादनमस्ति। अतो नियमानुसारेण नवजातः शिशू रात्रौ जागर्ति दिनेषु च स्वपिति। दिनेष्वपि भोजनायैव जागर्ति तदनु च स्वपिति। पितरौ सोमवासराच्छुक्रवासरपर्यन्तं कार्यं

कुर्वाणावश्राम्यताम्। केवलं शनिवासरेषु रविवासरेषु च मया सह समयं नीतवन्तौ। अतो रात्रौ मम जागृतिसमये पितामही मां निजाङ्के शायितवती दुग्धं च पायितवती। किन्तु भोजनशयनयोरन्तरा पितामहो मां कदाचित् स्वस्कन्धे वा स्वभुजयोरुपरि वा स्वहस्ताभ्यां गृहीत्वा शिशुसुलभशब्दैर्मां रोदनाद् विरामयितुं प्रायतत। कदाचिच्च सुखासन्द्यां निजोदरे मां निधाय मम मस्तकं स्वजान्वोरुपरि विन्यस्य हस्तौ च स्वहस्ताभ्यां गृहीत्वा स्वपादौ चालयन् शिशुगीतानि गायति स्म।''

''अहो विधातुर्वात्सल्यमय्याः सृष्टेः बालिकाम्बिकायाः साक्षात्कारः! ततस्ततः। '' देवराजोऽवदत्।

अर्धरात्रिषु प्रतिवेशिनां निद्राभङ्गभीतः स बहुशो कर्णेजप इव मां 'मम पुत्रः। मम शान्तो वत्सः।'

**जगत्समग्रं सुखितं हि सुप्तं कथं तु निष्का लभते न निद्राम्।**
**निशा लसिततारका स्तुतिपरा सुतां मम सुखेन सा स्वपयति।।**

निद्रां गतौ सुखमयीं पितरौ त्वदीयौ पुत्री पितामहयुता न गताऽस्ति निद्राम्।' इत्यादिकं मदीय-कर्णयोरद्यापि ध्वनितमिव भाति।''

''अद्भुतम्! अस्ति कश्चिद् विशेषोऽपि?'' शालिनी पृष्टवती।

''नित्यमपराह्णकाले पितामहो यदा हस्ताभ्यां जानुभ्यां च चलन् धावंश्च 'अश्वो धावति। अश्वो गच्छतीति' वदन् मां स्वपीठे पितामहीसहायेन धारयन्नखेलत् तदा पितामही 'हस्ती धावति। निष्का गजारोहणं करोतीत्यादिकं' समुदचारयत्। उभावहसताम्। अहमानन्दातिशयं चाऽलभे। बहुशो मां हस्ताभ्यां गृहीत्वा पितामही पितामहस्य पीठमारोहयत्।''

''निष्के! नैतादृशस्य दाम्पत्यस्य वैपरीत्यं लक्ष्यते।'' देवराजोऽवदत्।

''आनन्दातिशयं भुञ्जानस्य दाम्पत्यस्य कटुसमयस्तु मम पञ्चममासे समारब्धः। अस्मद्गृहस्य पुरःस्थितमार्गस्याऽपरे सन्मुखगृहे फ्रान्सीयं नवदम्पतीयुगलं निवसति स्म। तयोरपि क्रिस्टीनानाम्नी बालिकाऽऽसीत्। पतिः पेरिसपर्यटनमार्गदर्शकः। प्रातरेकादशवादने गृहान्निष्कासति पत्नी तु स्त्रीरोगनिष्णाताया वैद्यायाः समयपालनसहायिका। ताभ्यां पितामहो मां रक्षन् खेलयन् पालयंश्च विलोकितः। एकदा शनिवासरे तावुभावस्मद्गृहमागत्य क्रिस्टीनां सायं पञ्चवादनतः सप्तवादनपर्यन्तं रक्षितुं पालयितुं च प्रार्थितः पितामहः प्रतिसप्ताहं दिनपञ्चकस्य शतकत्रयं फ्रान्कानां (फ्रान्सदेशीयरूप्यकाणां) वेतनेन हृष्टः स्वीकृतिं समदर्शयत्।''

''विदेशीया व्यवहारकुशला उपकारं प्रशंसन्तीति श्रुतमस्माभिः। ततस्ततः।'' शालिनी कथितवती।

''क्रिस्टीनायाः सुखं सन्तोषमानन्दं च प्रेक्ष्याऽऽनन्दातिरेकेण तस्याः फ्रान्सीया जननी बहुशः पितामहं स्नेहेन समालिङ्गत्। पितामही तद्विलोक्य पुत्र्या पितरि वात्सल्यमिदमित्यमन्यत। पितामहो मे निर्लेप एवाऽलक्ष्यत। वसन्तकालेऽपराह्णे यदा पितामहो मां गृहीत्वा परिसरगतोद्यानेऽनयत् तदा अस्मत्पार्श्ववर्तिगृहे निवसन्ती मालिनीनाम्नी प्रौढाऽपि तस्याः पौत्रीं गृहीत्वाऽऽगच्छदुपाविशद् बालकाँश्च क्रीडापरान्

व्यलोकयत्। अल्पीयसि काल एव तया पितामहेन सामान्यो वार्त्तालाप: समारब्धो य: शनै: शनै: शृङ्गारिको जात:।''

''आ:! भ्रमरवृत्ति: पुरुषाणाम्!'' शालिन्या: क्रोधो लक्षित:।

''न हि। न हि। महोदये! एष तु कामातिरेको नारीणाम्। बहुशस्तया हस्तौ प्रसारयन्त्या हस्तेनाऽऽसनादुत्थानकाले वा स्वकीयवामश्रोण्या: स्पृष्टकालिनं सेवितम्। एकदा पितामहेन कथिता मालिनी धृष्टतयोक्तवती 'यन्त्रालये लोहमयैर्यन्त्रै: कार्यं कुर्वतो कार्यपूर्त्यै ध्यानपरायणस्य नीरसस्य स्नेहशुष्कस्य च जरठस्य रतिसुखे सन्तोषहीना पीडैवेति। पितामहेनोद्यानोपवेशनं स्थगितम्। मालिनी तु पितामह्या सह स्नेहसम्बन्धमजनयद् गृहागमनं चाऽऽरब्धवती।''

''एतदेव कारणं ननु? अनेन परस्त्रीसङ्गमेन कोपिता तव पितामही पितामहात् सम्बन्धविच्छेदं कृतवती ननु ?''

''न हि। न हि। महाशय! सम्बन्धविच्छेदस्य कारणं त्वन्यदेव। फ्रान्सीयदम्पती प्रतिसप्ताहं पारिश्रमिकं पितामहाय प्रायच्छत्। तेन द्रव्येण पितामहो दानकर्म कर्तुमिच्छन् पूर्णं धनं भारते स्वसुहृदे प्रैषयत्। पितामहस्य स सुहृद् बाल्ये वयसि विश्वासयोग्य आसीदत एव प्रतिदिनं पितामही क्लेशं कृतवती। एकदा तु साऽवोचत् 'मया तु त्वया सह पाणिग्रहणेन निष्कारणधनव्यय: सदैव साक्षीकृत:। किमर्थं मम पिता मां तव जाले पातितवान्। असन्तुष्टाऽहं तव दानसहायकर्मणा। अधुनाऽऽगामिनि जन्मनि त्वां मम जीवने द्रष्टुमपि नेच्छामि।''

''एतादृशवचनानि वदन्ती सा किं निम्नकुलीना ?'' देवराजोऽपृच्छत्।

''उभावप्युत्तमकुलजौ। किन्तु पितामह्यै धनसङ्ग्रहोऽतीव प्रिय:। सायंकाले मम पितर्यागते पितापुत्रौ कार्यार्थं गच्छाव इत्युक्त्वा गतवन्तौ घण्टाद्वयान्ते चाऽऽगतवन्तौ। पितामहेन स्वकीयं वस्तु स्वकीयपेटिकायां रक्षितम्। प्रभाते गृहं परित्यज्य भारतं पुनरागमनाय प्रस्थिते तेनोक्तम् 'सुहासिनि! फ्रान्सीयदम्पतीप्रदत्तधनं तु मित्राय दानार्थं समर्पितम्। भारते यदेव धनं विद्यते तत्सर्वं तवऽधिकारे संस्थाप्य दूरं गमिता न च तव जीवनेऽस्मिञ्जन्मनि वाऽऽगामिनि जन्मनि वाऽऽगमिष्यामि। इति कथयन् मम पितुर्मस्तकं स्पृष्ट्वा मां च ललाटे चुम्बनमदधाद् गृहाच्च बहिर्गच्छन् स मम पितरमवदत् ''शिवेश! गच्छामि पुनरदर्शनाय। कुत्राऽहं किं करोमि जीवामि वा मृतोऽस्मि भोजनं पानीयं वा प्राप्तमप्राप्तं वेति चिन्ता नैव कर्तव्या केनापि। फ्रान्सीयदम्पती क्षमायाचनपुर:सरं विज्ञापयामि गच्छामि च स्वयमेव विमानस्थलम्।''

निष्काया अस्खलितं रुदनं देवराजस्य हृदयं विह्वलमकरोदजल्पच्च। ''वागेवाऽमृतसदृशी सैव पुनर्हलाहलविषधरा। ततस्तत:।''

''तत: पितामह: फ्रान्सीयदम्पतीगृहं गतवान् तयोर्बालिकां स्नेहपूर्वकं चुम्बनं विधाय त्वरिताकस्मिकप्रस्थानार्थं क्षमामयाचत। स्वयमेव च विमानस्थलं गतवान्। तदनन्तरं किं जातं किं चाऽभुत् तत् केनापि ज्ञातुं प्रयासो न कृत:। अधुनाऽहं मातृपितृपितामहीरहिता जीवने पितामहवात्सल्यं हृदयेन

वाञ्छामि। तदर्थमेवाऽहमत्र भवत्सहायं कांक्षे।''

''निष्के! यदि ते पितामहः कस्मिंश्चित् समीपस्थले विद्यते तर्हि कापि समस्या नास्ति। किन्तु यदि हिमालये वा कन्याकुमार्यां वर्त्तते तर्हि तस्य प्राप्तिरीषत्कष्टप्रदा। तस्याऽन्वेषणमहमवश्यं करिष्यामि कारयिष्यामि च।'' देवराजस्तामाश्वसयत् पुनरागमनाय च व्यसर्जयत्।

देवराजेन गुप्तचरविभागाध्यक्षो दूरभाषेणाऽऽकारितः। स आगत्य राघवोऽहं वन्दनं विदधामीत्युक्त्वा नमस्कारं रचितवानाज्ञां चाऽयाचत। देवराजेन जिताशरायजोशिविषयकां सम्पूर्णां कथामन्यानि चाऽऽवश्यकाभिज्ञानानि स्पष्टीकृतानि। ततस्तेनोक्तम्।

''महाशय! प्रथमं तु तस्य चित्रं सम्पूर्णभारतस्य रक्षाधिकारिकार्यालयेषु प्रेषयामि। अत्रत्यानधिकारिणोऽपि त्वरितकार्यार्थमादेशं विधास्यामि शीघ्रमेव च सफलं परिणामं दर्शयिष्यामि।''

''साधु। साधु। विजयेन वर्धस्व।'' इत्युक्त्वा देवराजेन विसर्जितो राघवस्तस्मात् कार्यालयाद् बहिरागच्छन्नेव दूरभाषेण स्वकार्यमारब्धवान्।

द्वितीयेद्युरेवाऽऽगत्य राघवो देवराजं नमस्मारं विधाय शालिन्यै च शुभाशंसनं कथयित्वा स्मितं विधायाऽवदत्।

''महाशय! पर्वतः खनितो मूषकश्च संपादितः। अत्र गुर्जरप्रदेशे एव पञ्चाशदधिकानि शिशुनिकेतनानि सन्ति। तेषां द्वादश निकेतनानि येन प्रत्यक्षपरोक्षरूपेण सञ्चाल्यन्ते तस्यैकस्मिञ्चिकेतने निष्कानिकेतने मम पुत्रीद्वयं क्रीडनार्थं गच्छति।''

''तन्निकेतनं कुत्र ? शीघ्रं वदतु। तत्र गत्वा वयं तस्य सञ्चालकं परिपृच्छामः।'' शालिनी सरभसमवदत्।

''निष्कानिकेतनस्य सञ्चालको जिताशरायजोशी किम् ?'' देवराजोऽपृच्छत्।

''सम्भवतः स एव भवेत्।''

''कथमत्र सम्भवासम्भवकथा? देवराजः पुनरपृच्छत्।

''यतः सर्वेऽपि कार्यकारिसहायकास्तं जिताशदादेति कथयन्ति।''

''जिताशदादा? कदाचितज्जिताशरायजोशीमहोदयेन स्वकीयमिदं वात्सल्योपनाम रक्षितं भवेत्।''

''शालिनीमहोदये! भवदीया शङ्का तथ्या भवेत् किन्तु जिताशदादा प्रथमत एकाकी पितृमातृभ्रातृभगिनीपत्नीपुत्रादिहीनोऽस्ति। जनास्तं बालब्रह्मचारिणं कथयन्ति।''

''तथापि जिताशदादामहाशयमत्राऽऽकारयामि पृच्छामि च कदाचित् स जिताशरायजोशीं जानाति तस्य वा विषये तेन किञ्चिच्छ्रुतं भवेत्।'' देवराजोऽगादीत्।

द्वितीयदिनेऽपराणे जिताशदादा देवराजकार्यालये नमस्ते इत्युदीर्योपविशति। देवराजः कथयति।

''जिताशराय! किमहं भवन्तं जिताशदादा कथयेयम्?''

''यदि भवान् मामेतादृशवात्सल्यस्य पात्रं मनुते तर्हि नाऽस्ति मम काऽपि समस्या।''

''जिताशदादा! अहं तु निष्काया वात्सल्येनैवं सम्बोधयामि।''

‘‘निष्का? केयं निष्का? मया काऽपि निष्का न स्मर्यते।’’

‘‘भवदीया पौत्री या मामेतत्कर्मणि नियोजितवती।’’

‘‘महोदय! मम कृते तु सर्वे बालका बालिकाश्च निष्का:। निष्केति सुवर्णमुद्रा:।’’

‘‘जिताशदादा! नाऽहं सुवर्णमुद्राविषयकां वार्त्तां करोमि। अहं तु भवदीयपुत्रस्य शिवेशराय-जोशीमहोदयस्य पुत्रीविषयकां वार्त्तां करोमि।’’

‘‘महोदय! एतस्मिन् काले एतादृशि जगति का ते कान्ता कस्ते पुत्र इति सर्वत्र दृश्यते। भवान् किमर्थं निष्प्रयोजनां जन्मान्तरकथां करोति ?’’

‘‘जिताशदादा! दशवर्षेभ्य: पूर्वं फ्रान्सदेशे शिवेशरायस्य सपत्नीकस्य ज्वलितेन मोटरयानेन मरणं जातम्। तदनन्तरं भवदीयया पत्न्या सुहासिन्या प्रतिमासप्राप्तेन समाजसुरक्षाद्रव्येण स्वकीयस्य भवदीयपौत्र्या निर्वाह: सम्पादित:।

‘‘युज्यते। स्वधर्मपालने नार्या: कर्त्तव्यता प्रशंसनीया।’’

‘‘मासत्रयादूर्ध्वं सुहासिन्या हृदयरोगेण मरणं जातम्। मृत्यो: सप्ताहपूर्वमेव सुहासिन्या निष्कायै भवत्संकथा निष्कायै श्राविता।’’

जिताशरायस्य नेत्रपटले जलेनाऽऽवृते लक्ष्येते। स उत्तिष्ठति वदति च। ‘‘का मे कान्ता को मे पुत्र:। महोदय! यदि भवानन्यथा न मनुते तर्हि साधयाम्यहम्।’’

‘‘यदि भवत: सिद्धान्ते का ते कान्ता कस्ते पुत्र इति वर्त्तते तर्हि निष्कनिकेतनमिति नामाभिधानं किं लक्षयति ?’’

‘‘निष्क इति सुवर्णमुद्रा . . . .’’ इति वदन् स कार्यालयाद् बहिर्गच्छति। देवराज्यो निष्कां शालिन्या सह कार्यालयमागन्तुं दूरभाषेण संज्ञापयति। निष्का शालिनी च सहैव प्राविशत:।

‘‘निष्के! मम अधिकारिमित्र कश्चिज्जताशदादाऽन्विष्ट:। किन्तु स कुटुम्बहीनो वृद्धोऽस्ति।’’

‘‘महाशय! स एव मम पितामह:। यतस्तेनैव कथितमासीद् यत् स कदापि नान्वेष्टव्य:। स कुटुम्बहीन इति मन्तव्यो ज्ञातव्य। कुत्राऽस्ति स: ?’’ निष्का नेत्राश्रुविराजितवदना पृष्टवती।

‘‘अत्रैव कायावरोहणसमीपे तस्य कार्यक्षेत्रं निष्कानिकेतनम्।’’ देवराजोऽवदत्।



देवराजप्रेषितया शालिन्या सह निष्का स्वनामधेयाङ्कितं शिशुनिकेतनं प्रति प्रस्थिता। स्नेहावतारस्य पितामहस्य दर्शननमस्कारवात्सल्यालिनाभिलाषि हृदयं च तस्या मार्गे शालिनीवार्तालापे वीतध्यानमेव सञ्जातम्। सायं सार्धचतुर्वादने निष्कानिकेतनं प्रविशन्ती निष्का जिताशदादां शिशुभिः सह खेलन्तमपश्यत्। एकस्तस्य पीठे समारूढो हस्ती हस्तीति कूर्दनमकरोत्। अपरश्च तस्य धावलकेशान् संस्पृश्य अश्वस्य रशना धवला जातेत्युदचारयत्। अन्य हस्तिभूतस्य तस्य हस्तजानूनां मध्यत आवागमनं कृतवान्। परञ्च तस्य मुखसमीपे चोकलेटं समर्पयन् अश्वं बुभुक्षा बाधते हस्तिनं बुभुक्षा बाधत इत्यवदत्। निष्का शनैः शनैस्तस्य समीपमुपासरत् तस्य च पादौ संगृह्य संवाहयन्ती मन्दस्वरेणाऽवदत्।

''बालाः! अधुना हस्ती श्रान्तो जातोऽश्वोऽपि श्रमेण क्लान्तोऽभवत्।''

''न हि। न हि। अस्माकं हस्ती तु जिताशदादा। स कदापि श्रमं न भजति।''

जिताशरायेण सर्वे शिशवोऽतिस्नेहभरेण स्वरेणाऽपसारिताः क्षणं च निष्कां प्रति सजलनयना जरठा दृष्टिर्निक्षिप्ता पादौ संवाहनपरां निष्कां ललाटं चुम्बित्वा निजवक्षसि स्थापितवान्। निष्कां सगद्गदं रोदितवती। निष्कां सपितामहां प्रसन्ना विलोक्य शालिन्याश्चक्षुशोर्जलबिन्दवः शिशुभिः साक्षीकृताः।

**-सी/१-२, डॉ. सी. एस.पटेल एन्क्लेव,**
**३ प्रतापगंजः, बडोदरा-३९०००२**

# आशा एव जीवनम्

-डॉ. रामकिशोर मिश्रः

(१)

अस्ति किमिदम्? नाऽयं संयावः? मह्यं तु मधुरसंयाव एव दीयतां भद्रे! येन मदीये शरीरे सा शक्तिरुत्पन्ना भवेत्, यया जीवनं रक्ष्यते।' इति दिवाकरेण रोगशय्यामधितिष्ठता शरावे च दृष्टिं निपातयता कथितम्।

'अस्मिन् रोगे मिष्टान्ननिषेधोऽस्ति। कथमुष्णिका प्रदेया? त्वदीयशरीरात्तु शर्कराऽपि पतति। अतो मधुमेहे मिष्टान्नानि तु रोगप्रवर्धकान्येव भवन्ति।' इति चिकित्सापरिचारिकया सविनयं लवणभोजनपात्रं तत्सम्मुखम् सुस्थापितम्।

'भद्रे! न मह्यं रोचते लवणान्नम्। अतः पात्रमिदं मत्पार्श्वाद् दूरं नय। दुग्धमानीय प्रदेहि। तेनैवाऽद्यतनीं निशां गमयिष्यामि।' इति तेन विनम्रतया निवेदितम्।

'दुग्धेऽपि शर्करा भवति। अतस्तदपि भवतो हानिकरमेव। यदि भवानमिष्टमेव पयः पातुमिच्छति, तत्तु प्रदेयमेव भविष्यति। कथयतु भवान्, शर्करारहितं दुग्धं पिपासति श्रीमन्!' इति सुवर्णया नाम परिचारिकया विनम्रभावेन निगदितम्।

'तदहं शर्कराहीनं दुग्धमपि न पास्यामि। स्वादलिप्सायामहमनेन रोगेण ग्रस्तोऽभूवम्। पुनरपि स्वादलिप्सा क्षीणा न भवति, अपि तु दिने दिने प्रवर्धत एव।' इति तेन तद्भावजिज्ञासयोदीरितम्।

'इच्छा तु भोगेन वर्धते, नियन्त्रणेन च क्षीयते। अतः स्वस्वादलिप्सां नियन्त्रितां कुरु, येन तव शरीरं वर्धेत, क्षयरोगाच्च मुक्तिं प्राप्नुयाः।' इति निगद्य सा द्राक्तरेणाऽऽहूता तस्मात् कक्षाद् बहिर्गता।

(२)

दिवाकर एको मध्यमवर्गीयपरिवारस्य युवाऽष्टादशवर्षीयो बी.एस्-सी. परीक्षोत्तीर्णः। तारुण्यादयं कामयते। परं कोऽपि बालिकापिता तस्य यूनो विवाहं न चिकीर्षति, य आजीविकाहीनो वर्तते। सामयिके महार्हयुगे दम्पती गृहव्ययाय धनमर्जयतः। यश्च जीविकाहीनोऽस्ति, तस्य समाजे न कोऽपि सम्मानः। अस्यां स्थितावपि यदि स विवाहं कामयेत, तत्स विवाहचिन्तया रोगग्रस्तस्तु भविष्यत्येव। दिवाकरोऽपि विवाहचिन्तया मधुमेहग्रस्तोऽभूत्। तस्य शरीरात्प्रतिदिनं शर्करा निपतति स्म, येन तस्य रूपलावण्ययुक्तोऽपि कायो नक्तन्दिवं क्षीयमाण आसीत्।



रोगेण चिन्तितौ तस्य मातापितरौ तं चिकित्सकसमीपे नीतवन्तौ। निरीक्षणानन्तरं चिकित्सकेन तं नवदेहल्यामखिलभारतीयाऽऽयुर्विज्ञानसंस्थाने चिकित्सायै प्रवेशयितुं तौ निवेदितवन्तौ। ततस्ताभ्यां स रोगमुक्तये तत्र प्रवेशितः। यत्र तृतीये तले पञ्चमे कक्षे तस्य रोगिशय्यासख्या-(१२) द्वादश विद्यते।

(३)

'एकस्मिन्मासे व्यतीतेऽति न कोऽपि लाभो लक्ष्यते दिवाकर! तावकीने स्वास्थ्ये। किं पथ्यं कुपथ्येन विक्रियते? द्राक्तरेणाऽद्य कथितं यद्दिवाकरस्याऽतिरिक्तचापोऽपि विद्यते। औषधप्रयोगेऽपि तस्य स्वास्थ्यमनुदिनमेव पतति। भेषजप्रभावस्यस्य काये कथं न भवति ? नैव ज्ञायते।' इति सुवर्णया कथितम्।

'भवन्तः सर्वे मां जीवयितुमिच्छन्ति, परं मदीया प्रकृतिस्तु मां हन्तुमीहते। अधुना जीवने न मे रुचिः यथाशीघ्रं क्षीयमाणो मे देहो मृत्युमवाप्नुयादिति भगवन्तं भूतभावनं परमेश्वरं प्रार्थयामि।' इति दिवाकरेणोत्तरितम्।



'कथं मुमूर्षसि ?'

'रोग एव ईदृशः, येन देहः प्रतिदिनमेव क्षीयते।'

'रोगोऽयं कथं जातः ?'

'स्त्रीकामनया।'

स्त्रीकामनया?

'आमेवमस्ति सुवर्णे!'

'कि कयाचित्प्रेमिकया वञ्चितोऽसि?'

'आम्, या पूर्वं मदीयाऽऽसीत् साऽधुना परकीयाऽभवत्। तच्चिन्तयैवाऽहं मधुमेहग्रस्तोऽभूवम्।

'पूर्वं त्वया स्वस्थेन भाव्यम्, ततो विवाहस्य का चिन्ता?'

'अधुना माम् का विवाहयिष्यति?'

'अहम् त्वां विवाहयिष्यामि, कथय त्वं मया सह विवाहं करिष्यसि दिवाकर!'

'आम्, अहं त्वया सह विवाहं करष्यामि सुवर्णे!'

'यदि त्वं माम् विवाहयितुमिच्छसि, तन्मम सर्वं कथनं तव मान्यं भविष्यति। नो चेन्नाहं त्वां विवाहयिष्यामि, वद, मम वार्तामङ्गीकरोषि ?

'सुवर्णे ! तव वार्तां स्वीकरोमि। त्वदीयं सर्वं कथितमपि मंस्ये।'

'अद्यतनदिवसात्त्वया प्रतिदिनमौषधसेवनं समये कर्तव्यम्, येन त्वं यदा स्वस्थो भविष्यसि, तदा मां विवाहयिष्यसि' इति कथयन्त्या सुवर्णया यदा दिवाकरस्य मुखं प्रति स्वदृष्टिर्निपातिता, तदा तस्य मुखं प्रसन्नमासीत्।

(४)

यदा यदा सुवर्णा दिवाकरपार्श्वमायाति स्म तदा तदा स तां भाविनीं पत्नीमेव पश्यति स्म। तामेकस्मिन्दिने पत्नीमवलोकयितुमाशया स शनैः शनैरौषधसेवनेन स्वस्थोऽभवत्।

एकदा तस्मिन्नेव चिकित्साकक्षे भेषजप्रदानाय समागतायास्तस्याः पाणिं गृहीत्वा सोऽब्रवीत्-'सुवर्णे'! इदानीमहं सर्वथा स्वस्थोऽस्मि, त्वमधुना मया सार्धं कदानीं विवाहं करिष्यसि?'

'करिष्यामि, करिष्यामि, दिवाकर! विश्वसिहि, यदि त्वं मे कथितं पालयिष्यसि, तदहं तत्र पत्नी भविष्यामि। मां प्राप्तुमधुना त्वया प्रतीक्षा कार्या।'

'कञ्चित्कालं प्रतीक्षा करणीया भविष्यति सुवर्णे! मया तु तव कथितं पालितं परमधुना त्वं तन्न पालयसि, कथमेतत् ? कथय। त्वामधुनाऽहं प्रियां कथयिष्ये, किं स्वीकरोषि ?

'स्वीकरोमि, स्वीकरोमि दिवाकर! परमहन्ते सत्यरूपा प्रिया तदानीमेव भविष्यामि, यदानीं त्वमधुना मम कथितं पालयिष्यसि।'

'पालयिष्यामि, कथय, किमिदानीं तव कथितं पालनावशेषमस्ति प्रिये! त्वयाप्यहं प्रियः सम्बोधनीयः। यदि त्वं मां प्रियं प्रियतमं न कथयिष्यसि, तदहं त्वदुक्तं न मंस्ये।

'प्रिय दिवाकर। त्वामहं प्रियतमं कथयामि परमधुना मम कथनं मत्वा त्वया क्वापि भृत्तिर्गृहीतव्या, येनाऽऽवयोर्दाम्पत्यजीवनं ससुखं स्यात्। गृहे दूरदर्शनादि सर्वमावश्यकवस्तुजातं भवेत्। एतत्सर्वं तदानीमेव भविष्यति, यदानीं त्वमपि धनमर्जिष्यसि। अहन्तु मासिकवेतनरूपेण पञ्चशतानि रूप्यकाणि प्राप्नोमि। अनेन धनेन गृहव्ययः कथं भविष्यति? पुनरावयोरपत्यान्यपि सम्भविष्यन्ति प्रियतम! तदानीं व्ययो वर्धिष्यते। अतस्तादृशः प्रबन्धो विवाहात्पूर्वमेव कर्तव्यः। कथय, सत्यमुक्तं मया न वेति।'

'त्वया सत्यमेव कथितं सुवर्णे। परमहन्तु एम.एस्-सी. परीक्षामुत्तीर्य कस्मिन्नेव महाविद्यालये प्रवक्ता भवितुमिच्छामि प्रिये! ततस्त्वमिमां स्वसेवावृत्तिं त्यक्ष्यसि। पुनस्त्वमेकस्य प्राध्यापकस्य भार्या भविष्यसि। यतो हि प्राध्यापकभार्यया परिचारिकया न भवितव्यम्।'

'यदिदृशस्त्वदीयो विचारस्तत्त्वया कस्मिश्चिन्महाविद्यालयेऽध्ययनं करणीयं प्रियवर!'



देहलीविश्वविद्यालयादहं स्नातकोत्तरपदवीं ग्रहीष्यामि सुवर्णे! परं तत्राध्ययनार्थं मम समीपे धनं नास्ति, यदि त्वमत्र सहायतां कर्तुं शक्नोषि, तदावयोर्जीवनं सुखमयं भविष्यति। कथय, को विचारस्तव प्रिये!

'यदि त्वं मां विवाहयितुमिच्छसि, तदहं तवाध्ययनव्यये साहाय्यं करिष्ये प्रियतम!' इति वदन्ती सा द्राक्तरकक्षाद् घण्टिकाध्वनिमाकर्णयन्ती तस्माच्चिकित्साकक्षाद् बहिरगच्छत्।

(५)

दिवाकरो देहलीविश्वविद्यालये विज्ञानसङ्काये भौतिकविभागे M. Sc. कक्षयां प्रवेशमगृह्णात्। एतदर्थमर्थसाहाय्यं सुवर्णया कृतम्।

समयानुसारं दिवाकरो M. Sc. भूत्वा देहल्यामेव राजधानीमहाविद्यालये प्रवक्ताऽभवत्। परमधुना तेन सुवर्णासमीपगमनं परित्यक्तम्। स्वस्मिन्नेव महाविद्यालये तस्य सम्पर्क एकया प्राध्यापिकया सह सञ्जातः। सम्पर्कोऽयं शनैः शनैर्वैवाहिकबन्धनमगृह्णात्, परमद्य सुवर्णायास्तत्र न किमपि स्थानमासीत्।

-२९५/१४ पट्टीरामपुरम्
खेकडा (बागपत) उ.प्र. २४०१०१

# भारत-छोड़ो-आन्दोलनम्

भारत-छोड़ो-आन्दोलम्, अगस्तमासे ८ दिनांके १९४२ तमे वर्षे अशेषे देशे आरब्धम्। तस्मिन् काले द्वितीयविश्वयुद्धं प्रवर्तते स्म। एतत् एवं विधम् आन्दोलनमासीत् यस्य लक्ष्यं भारतात् ब्रिटिशसाम्राज्यस्य समाप्तिरासीत्। आन्दोलनविषयको निर्णयो महात्मगान्धिना अखिलभारतीय-कांग्रेस-समितेः मुम्बई-अधिवेशनानन्तरं कृतः। इदम् आन्दोलनं भारतीय-स्वतन्त्रता-संग्रामस्य काले विश्वविख्यातस्य काकोरीकाण्डस्य १७ वर्षानन्तरम् अगस्तमासे ९ दिनांके १९४२ तमे वर्षे गान्धिनः आह्वाहने समग्रे देशे आरब्धम्।

इदं भारतं शीघ्रं मोचयितुम् आङ्ग्लशासनं च विरुध्य सविनयावज्ञा-आन्दोलनम् आसीत्। क्रिप्स-मिशनस्य वैफल्यानन्तरं महात्मगान्धी ब्रिटिशशासनं विरुध्य तृतीयान्दोलनारम्भस्य निर्णयम् अकरोत्। अगस्तमासे ८दिनांके १९४२तमे वर्षे सायंकाले अखिलभारतीय-कांग्रेस-कमेटी इत्यस्य बम्बईसत्रे 'अंग्रेजो भारत छोड़ो' इति नाम प्रदत्तम्। यद्यपि अस्य आन्दोलनस्य घोषणानन्तरं शीघ्रमेव गान्धी आङ्ग्लसर्वकारेण निगृहीतः परन्तु आदेशं युवकार्यकर्तारः जनप्रदर्शनकारिणश्च आन्दोलनम् अजस्रं संचालितवन्तः। कांग्रेसे जयप्रकाशनारायणसदृशाः समाजवादिसदस्याः भूमिगतप्रतिरोधि-गतिविधिषु आधिक्येन सक्रियाः आसन्।

पश्चिमे सतारा पूर्वभागे च मेदिनीपुरसदृशेषु नैकेषु जनपदेषु स्वतन्त्रसर्वकारस्य प्रतिसर्वकारस्य च स्थापना कृता। आङ्ग्लीयाः आन्दोलनम् अभिभवितुं दृढप्रयासान् कृतवन्तः पुनरपि शमनाय वर्षाधिककालेन तद् अभूत्। विश्वयुद्धे इङ्ग्लैण्डदेशः व्यग्रः परितश्च शत्रुभिः आवृतः आसन् तत्र च नेताजीद्वारा आजाद-हिन्द-फौज इति दलाय दिल्लीचलो इति उद्घोषः आदेशः प्रदत्तः, गान्धिना अपि स्ववसरः इति ज्ञात्वा अगस्तमासे ८ दिनांके १९४२ तमे वर्षे बम्बयिमध्ये भारत छोड़ो, देहं वा पातयेयं कार्यं वा साधयेयम्, इत्यनेन भारतीयाः प्रेरिताः। गान्धी च यरवदा पुणेस्थिते आगा खान पैलेस इति स्थानं गतवान्। अगस्तमासे ९ दिनांके १९४२तमे वर्षे च आन्दोलननेतृत्वं लालबहादुरसदृशेन युवनेत्रा कृतं तेन च उग्रत्वेन आन्दोलनं संचालितम्।

अगस्तमासे १९४२ तमे वर्षे शास्त्री निगृहीतः। अगस्तमासे ९ दिनांके १९२५तमे वर्षे ब्रिटिशसर्वकारम् उत्पाटयितुं बिस्मिलस्य नेतृत्वे हिन्दुस्तानप्रजातन्त्र-संघस्य दश कर्मठा उग्रकार्यकर्तारश्च काकोरीकाण्डम् अकुर्वन्। तत् स्मरणे च अगस्तमासे ९दिनांके काकोरी-काण्ड-स्मृतिदिवस-आयोजनस्य परम्परा भगतसिंहेन आरब्धा, एतस्मिन् दिने व्यापकसंख्यायां युवकाः समवेतभावेन तत्र भवन्ति स्म। गान्धिना परीक्षितरणनीत्याः अन्तर्गतम् अगस्तमासे ९ दिनांके १९४२तमे वर्षे दिनं तत् चितम् आसीत्।

अगस्तमासे ९ दिनांके १९४२ तमे वर्षे कांग्रेसवर्किंगकमेटी इत्यस्याः सदस्याः निगृहीताः कांग्रेस

यरवदा-पुणेमध्ये आगा खान पैलेस इत्यस्मिन्, डॉ.राजेन्द्रप्रसादश्च पटनाकारागृहे अन्ये सदस्याश्च अहमदनगरस्य दुर्गे निगृहीता:।

भारत-छोड़ो-आन्दोलनं यथार्थत: जनान्दोलनम् आसीत्, यत्र लक्षाधिका: सामान्या: भारतवासिन: सम्मिलिता: आसन्। अस्मिन् आन्दोलने व्यापकसंख्यया युवान: भागं नीतवन्त:। ते स्वमहाविद्यालयीयकालं परित्यज्य कारागृहान् गतवन्त:। जूनमासे १९४४ तमे वर्षे यदा विश्वयुद्धं समाप्तिपथे आसीत् तदा गान्धी अपि मोचित:। कारात् निर्गमनानन्तरं स: कांग्रेसलीगयोर्मध्ये मैत्रीं कारयितुं जिन्नया सह वार्तालापम् अकरोत्। असहयोग-आन्दोलनेन देशस्य स्वातन्त्र्याय जनेभ्य: नवीनप्रेरणा प्रदत्ता।

प्रमुखनेतृणां निग्रहणानन्तरम् आन्दोलनं नेतृत्वहीनं जातम्। अनन्तरकाले यानि हिंसात्मककार्याणि जातानि, तद्विषये द्विविधविचारयुक्ता: समूहा: आसन्, एक: समूह: स्वतन्त्रतायै हिंसात्मकमार्गम् इच्छति स्म अपरश्च शान्तभावेन इच्छति स्म। एतस्मात् एव आन्दोलनकारिषु ऐक्यभाव: नासीत्।

अस्य आन्दोलनस्य काले सर्वकारिकर्मचारिण: सेना आरक्षका: स्वदेशिनृपा: सर्वकारं प्रति निष्ठावन्त: आसन्। अत: सर्वकारस्य कार्यं निर्विघ्नं जायते स्म। सर्वकारस्य निष्ठावन्त: कर्मचारिण: आन्दोलनकारिषु भीषणात्याचारान् कृतवन्त:। एतादृशा: कर्मचारिण: आन्दोलनकारिणां विषये गुप्तसूचना: आङ्ग्लसर्वकाराय यच्छन्ति स्म यत: आन्दोलनं शमयितुं सर्वकारकार्यं सरलं भवति स्म।



सर्वकारस्य पार्श्वे यानि साधनानि शक्तिश्च आसीत्, तावन्ति आन्दोलनकारिणां पार्श्वे नासन्। आन्दोलनकारिणां कश्चिदपि गुप्तचरविभाग: नासीत्, तस्मात् परस्परसूचनाप्रापकानि साधनानि आसन्, सर्वकारस्य अपेक्षया आन्दोलनकारिणां समीपे अन्यानि साधनानि अपि न्यूनानि आसन्। सर्वकारेण स्वीयानि सर्वाणि साधनानि आन्दोलनाभिभवाय नियुक्तानि। जनेषु घोराणि आक्रमणानि कृतानि भीषणात्याचाराश्च कृता:, अत्याचाराणां सामुख्यं साधारणजननानां कृते कठिनम् आसीत्। अत: आन्दोलनस्य शमनाय पिधानाय च सर्वकारेण जना: बाध्या: कृता:। यद्यपि इदम् आन्दोलनं तत्कालम् आङ्ग्लीयान् भारतात् निष्कासने असफलं जातम्, किन्तु भारतीयजनतया यत् बलिदानं कृतं तत् व्यर्थं नाभूत्। अनेन आन्दोलनेन भारतीयस्वतन्त्रता सन्निकर्षं प्राप्नोत्।

-प्रसार-प्रसार: विभाग:
**दिल्ली-संस्कृत अकादमी**

# लघुक्षणिका

-डॉ. भूपेन्द्र कुमार राठौरः

**( प्रथम दृश्यः )**

(वार्तालापः)

**अयं दृश्यः परिवारस्य मध्ये वार्तायाः वर्तते। सामाजिक जीवने परिदृश्यते यत् वर्तमाने मानवाः एकांकी भवन्ति। ते परस्पर स्नेहपूर्णवार्ता न कुर्वन्ति। स्व-स्वकार्ये संलग्ना भवन्ति। अतः एतस्मिन् प्रसंगे परिवारस्यमध्येवार्तायाः महत्तास्ति।**



**रामः** – नमो नमः मोहनः।

**मोहनः** – नमस्कारः।

**रामः** – भवान् किदृशः अस्ति।

**मोहनः** – स्वस्थः अस्मि।

**मोहनः** – आगच्छ आगच्छ भातृः।

**रामः** – उचितमस्ति।

**मोहनः** – अयं मम पितुः अस्ति।

**रामः** – उचितमस्ति। प्रणामं करोमि।

**दीनदयालः** – कुशलम् अस्तु।

**मोहनः** – इयं मम जननी अस्ति। मम जननी सर्वकारीय-सेवायां अध्यापिकापदे कार्यं करोति।

**रामः** – प्रणामं करोमि। उचितमस्ति।

**मोहनः** – इयं मम भगिनी अस्ति। अस्याः नाम राधिका अस्ति।

**रामः** – नमस्कारम्।

**रामः** – सा का अस्ति ?

**मोहनः** – सा मम भार्या अस्ति।

**रामः** – भातृजायां प्रणामं करोमि।

**उमा** – नमस्कारम्।

**मोहनः** – उमा गच्छ, चाय पानम् आनयतु।

**उमा** – गच्छामि। जलं चायं च गृहीत्वा उमा आगच्छति।

**मोहनः** – भवान् जलं ग्रहणं करोतु।

**रामः** – उचितमस्ति।

**मोहनः** – चायं पिबतु भवान्।

**रामः** – सम्यक् अस्ति।

**रामः** – अहम गृहं गन्तुमिच्छामि। भवान् आज्ञां ददतु। आम्। भ्रातृजायया: सह भवान् मम गृहम् आगच्छतु।

**मोहनः** – अवश्यमेव आगमिष्यामि।

**रामः** – धन्यवाद:।

**मोहनः** – पुन: मिलाम:।

**मोहनः** – उमा, अहम् अतीव बुभूक्षा अस्मि।

**उमा** – अहं शीघ्रं भवत्यै भोजनम् आनयामि।

**मोहनः** – गच्छ उमा।

(उमा गच्छति शीघ्रं भोजनं गृहीत्वा आगच्छति)

**उमा** – भवान् हस्तपादौ प्रक्षालनं करोतु। तत्पश्चात् भोजनं ग्रहणोतु।

**मोहनः** – गच्छामि।

**मोहनः** – भोजनं करोति।

**मोहनः** – उमा, भोजनं स्वादिष्टम् अस्ति। भवत्या पाकशालायां निपुणा अस्ति।

**उमा** – धन्यवाद:।

**मोहनः** – अतीव प्रसन्न: अस्मि। भोजनं बहु उत्तमम् अस्ति। अहं विश्रामं करिष्यामि।

।। उमा गृहकार्ये संलग्नं भवति। मोहन: विश्रामं करोति। सर्वे परस्परं प्रसन्नं भवन्ति।

**( द्वितीय दृश्यः )**

(पर्यावरणम्)

**साँयकालस्य समयः। उमा मोहनेन सह उद्याने भ्रमणं करोति। तदा पर्यावरणप्रसंगे चर्चा भवति। तस्य वर्णनमस्मिन् दृश्ये वर्णितमस्ति।**



**मोहनः** – उमा, प्रकृति: रमणीयास्ति।

**उमा** – आम्, प्रिय:।

**मोहनः** – उद्याने अनेका वृक्षा: लताश्च सन्ति।

**उमा** – मनोहर: दृश्य: अस्ति।

**मोहनः** – अत्र खगा: भ्रमणं कुर्वन्ति। पुष्पाणि फलानि च अत्र उद्यानं परित: सन्ति।

**उमा** – प्रिय: इदम् उद्यानम् अस्ति। एतस्मात् कारणात् अत्र दृश्य: रमणीय: अस्ति।

**मोहनः** – आम्, उमा। परं भवत्यां किं कथयितुं वाञ्छति। उद्यानम् अस्ति। अत: प्रकृति: शोभायुक्त: अस्ति।

**उमा** – प्रिय: आम्। प्रकृति: वास्तविकस्वरूपे रमणीया नास्ति। पर्यावरणक्षेत्रस्य विषये समस्या तीव्रतरा कष्टतरा अस्ति।

**मोहनः** – जानामि उमा, जानामि। परं किं भविष्यति। मानवः अद्य स्वार्थयुक्तः अभवत्। सः सम्यक्रूपेण जानति यत् वनस्पतयः अस्माकं प्राणः सन्ति। परन्तु सः निकृष्टतरः अस्ति।

**उमा** – प्रियः चिन्तायुक्तः विषयेऽस्ति, परं अस्य समाधानम् अवश्यमेव अस्ति।

**मोहनः** – किं समाधानम् उमा।

**उमा** – अस्मिन् क्षेत्रे समाजस्य मध्ये चेतना जाग्रत् कुर्यात्। विद्यालयेऽपि, सरकारी उत्सवोऽपि सामाजिकरूपेण प्रयासः कुर्यात्।

**मोहनः** – अहम् अद्यैव पर्यावरणक्षेत्रस्य विषये समाजे चेतना जाग्रतं करिष्यामि।

**उमा** – अहमपि करिष्यामि।

**मोहनः** – उमा, एकः विचारः अस्ति।

**उमाः** – किं विचारः प्रियः।

**मोहनः** – मार्चमासस्य पञ्च दिनाँकेऽस्माकं विवाहस्य प्रथम वर्षगाँठः अस्ति।

**उमा** – आम्, तदा किं।

**मोहनः** – अस्मिन् अवसरे आवाम् आम्र वृक्षस्य पादपः रोपयिष्यावः। यः अस्माकं प्रेम्णः सूचकं भविष्यति।

**उमा** – ओह ! आश्चर्यम् अस्ति। भवतः विचारः प्रेरणास्पदः अस्ति।

तौ (उमा–मोहनः च) हसतः।

उमा पुनः कथयति – विवाहोत्सवे, जन्मोत्सवेऽन्यात्सवेषु अपि इदं कार्यं करणीयः।

**मोहनः** – आम्, उमा। उमा गृहं प्रति चलतु।

उमा मोहनेन सह गृहमागच्छति। तदैव मोहनेन सह उमा अस्मिन् कार्ये प्रवृत्तः अस्ति। फलस्वरूप परिवारस्यान्यजनाः, ग्रामस्य जनाः तयोः सहायतां कुर्वन्ति। ग्रामे **पर्यावरणस्य**विषये चेतना जाग्रतं भवति।

**( तृतीय दृश्यः )**

**( स्वच्छ भारतः स्वस्थ भारतः )**

**अस्मिन् प्रसंगे देवालयस्य घटनायाः वर्णनमस्ति। देवालयस्यपरिसरः स्वच्छः नास्ति। इतस्ततः पत्रं पुष्पं प्लास्टिकबैगः इत्यादयः सन्ति। देवालये शिवस्य मूर्तिः अस्ति। शिवं पूजयितुं महिलाः आगच्छन्ति। तासु-कविता-किरण-उमादि सन्ति।**



**किरण** – नमस्कारं भगिनी।

**उमा** – नमो नमः।

**कविता** – नमस्कारं करोमि।

**किरण** – पश्यतु, भगिनी। देवालयस्य परिसरः स्वच्छः नास्ति। जनाः अत्र आगच्छन्ति परं एतस्मिन् विषये कोऽपि न विचारं कुर्वन्ति, सर्वे जनाः नेत्रं निर्मिल्य इतस्ततः भ्रमणं कुर्वन्ति। अद्य भगिनी, स्वच्छतायाः विषये विचारं करिष्यामः, भारत–सर्वकारः अपि एतस्मिन् विषये जनतायाः मध्ये चेतना जाग्रतं कर्त्तुं तत्परः अस्ति।

**उमा** – आम् भगिनी। अस्माकम् प्रधानमन्त्री श्रीमन्तः नरेन्द्रमोदी महाभागः अपि अनेकावसरे कथयति भारतः अस्माकं माता अस्ति। अस्माकं दायित्वमस्ति माता स्वच्छास्तु। अतः परस्पर मिलित्वास्य दायित्वस्य निर्वाहं भवेत्।



**कविता** – अस्माकं राष्ट्रपिता महात्मागाँधी महोदयापि स्वच्छतायाः विषये प्रेरणां ददाति। सः स्वकार्यं स्वयं करोति।

**किरण** – आम् भगिनी। अद्य वयं मिलित्वा देवालयस्य सम्मार्जनस्य हेतोः कार्यं करिष्यामः।

**सर्वाः तथैव कुर्वन्ति।**

देवालस्य परिसरे स्थितः जनाः तां दृष्ट्वा परिसरस्य सम्मार्जितुं संलग्ना भवन्ति। किञ्चत् कालपश्चात् देवालयः स्वच्छः भवति। तत्पश्चात् सर्वे मिलित्वा प्रतिज्ञां कुर्वन्ति अद्यात् स्वच्छतायाः विषये कार्यं करिष्यन्ति यतस्मात् वयं स्वस्थः भविष्यामः। सार्थकः भविष्यति **स्वच्छ भारतः स्वस्थ भारतः**।

**समाप्तम्**



**– २/K/१२, आदित्य कुंजः महावीर नगरम्**
**विस्तार योजना कोटा ( राजस्थानम् )**
**पिन. ३२४००९**

# राष्ट्रभाषा-संस्कृतम्

-आचार्यः मनोज डिमरी

कस्या अपि भाषाया महत्वं तद्भाषाभाषिणां सङ्ख्यायामश्रितं भवति। अथवा कियत्सम्पन्नं विपन्नं वा तस्य साहित्यमस्ति इत्यत्राऽपि च स्थितं लभते। अत्रेदमवधार्यं भवति यदिदं साम्प्रतिकं भारतवर्षं तदेव पुरातन आर्यावर्तः। अत्र निवासिनः आर्याः, येषाम् आद्या संस्कृतिः वैदिकीसंस्कृतिः आसीत्, यतो हि तदानीन्तनाः जनाः संस्कृतभाषाभाषिणः आसन्। तेषु अपि ब्रह्मणक्षत्रियविशां भाषां संस्कृतभाषा एव आसीत्। अधीतविद्याः स्त्रियः अपि संस्कृतज्ञा भवन्ति स्म, अकुलीनाः पुरुषा स्त्रियश्च असंस्कृतज्ञा, मूर्खा अत एव तेषां भाषा अपभ्रंशबहुला प्राकृतेति अद्यावधि नाटकेषु दृश्यते।

भगवतो रामचन्द्रस्य प्रेयान् सेवको हनूमान यदा दशमाषकपरिमितां कनकमयीं मुखमुद्रितां मुद्रामादाय सीतायै ददौ तदा स विचारयतिस्म यत्सीतायै सन्देशः कां भाषामाश्रित्य दद्यामिति। तद्यथा वाल्मीकीये रामयणे-

**यदि वाचं वदिष्यामि द्विजातिरिव संस्कृताम्।**
**रावणं मन्यमाना मां सीता भीता भविष्यति॥**

अनेन सुतरां सिद्ध्यति यद् वेदवेदांगपारगः त्रैलोक्यविद्रावणो रावणः संस्कृतज्ञः संस्कृतवाङ्-मुखरोऽपि आसीत्। किमाश्चर्यमतः परं यद् मनुष्येतरा अपि संस्कृतभाषाविद आसन् पुराकाले। किं प्राचीनकालिकया चर्चया, साम्प्रतमपि जावा-सुमात्रा प्रभृतिद्वीपेषु सन्ति सङ्ख्यातीताः संस्कृतज्ञा सङ्ख्यावन्तः। अद्य अस्माकं सर्वकारः अन्यभाषापेक्षया संस्कृताय यतमानो दृश्यते मन्थरगत्या। विषयेऽस्मिन् न सर्वथा सर्वकारो दोषाय कल्पते, यतो हि संस्कृतभाषोपजीविनो वैदिकाः, पौराणिकाः, तान्त्रिकाः, मान्त्रिकाः, ब्राह्मणः किं बहुना ये ये च संस्कृतभाषां स्वां मातरमिव मत्वा तत्र श्रद्धाबद्धः बधानाः सन्तिः ते सर्वेऽपि सम्भूय विश्वस्मिन् तस्य प्रचारम्, प्रसारम्, अध्ययनम्, अध्यापनम्, अनुशीलनञ्च कुर्यः तद्विदान् प्रोत्साहयेयुः, समये समये सर्वकारं निवेदयेयुः च तर्हि नूनमेतस्याः सम्भवेद् विकासः। यदा वयं संस्कृतभाषाया महत्त्वविषये विवेचयामः तदा तु निर्भ्रान्तं मतमेतदुदेति यत् संस्कृतभाषाया महन्महत्त्वं वरीवर्ति, सा चरीकर्ति अभारतीयानपि भारतीयमतावलम्बिनः, जरीहर्ति विपुलमज्ञानध्वान्तं नरीनर्ति साम्प्रतमपि सर्वदेशजुषां विदुषां रसनारङ्गभूमौ, दरीदर्ति समस्तशब्दवैकल्यजातं न्यूनत्वम्। यावन्तो हि विषयाः सन्तिः सम्भविष्यन्ति च तावन्तः सर्वेऽपि गद्यपद्यरूपे संस्कृतसाहित्ये चिराद् विराजन्ते। तेषां विपुलः सङ्ग्रहो यदि कुत्रापि सुलभोऽस्तिः सः संस्कृत एव। तदत्र दिङ्मात्रमुदाह्रियतेचत्वारो वेदाः संस्कृतमयाः तेषां भेदोपभेदाः शाखाप्रभृतिरूपैः परिकल्पिता सुशोभन्ते। तद्वाङ्मयम्- **''शिक्षा कल्पो व्याकरणं निरुक्तं छन्दः ज्यौतिषम्।''** इत्येतानि वेदानां षडङ्ग ख्यातानि। एतेषां स्थितिः गीर्वाणभाषायामेव

परिलक्ष्यते। तदनन्तरं स्मृतीनां रचनापि संस्कृतवाङ्मये एव दृश्यते, इतः परं पुराणानां सङ्ख्या अष्टादशपरिमिता, तथैवोपपुराणानामपि गणना विद्यते। तदनु काव्यनाटकचम्पूप्रभृतीनां गणानां कर्तुं कः पारयति। महान्ति सूचीपत्राणि तत् तद् ग्रन्थालयैः प्रतिवर्षं प्रकाश्यन्ते पुनरपि न तत्साहित्यं शेषतां याति, इत्यहो! संस्कृतभाषाया भण्डारस्य निःसीमता।

एतादृग्विपुलं भाषाभण्डारं यस्या वरीवर्ति तस्या विषये विवेचनं सति सूर्ये प्रकाशः कीदृशो भवति इतीव चर्चावद् हास्यास्पदं भवति। विचित्रोऽयं लोकः यः परोत्कर्षं न सहते। एवमेव कैश्चन परोत्कर्षा सौढैः प्रचारितमेतल्लोके यद् विदेशीया विद्वांस एनां संस्कृतभाषां मृतामिति कथयन्ति। किन्तु तान् कः पृच्छेत्? कश्च-उत्तरयेत्? यत् केन कम्प्रति कथितं केन वा श्रुतं लिखितं वर्तते, तच्च केनावलोकितम्। सर्वत्र अन्धानुकरणम्प्रचलति, एतस्य विषये श्रीमता विष्णुशर्मणा पञ्चतन्त्रे लिखितमस्ति–

**गतानुगतिको लोको न लोकः पारमार्थिकः।**
**बालुकालिङ्गमात्रेण गतं मे ताम्रभाजनम्॥**

इत्थमेव ये औचित्यविचारविहीना भवन्ति त एव परपादैः प्रचलन्ति, परदृष्ट्याऽवलोकयन्ति, स्वविचारशून्यतया इत्थमनर्थमाचरन्ति। एतादृशी एव चर्चा इयमप्यस्ति, यत् 'संस्कृतभाषा मृतेति' वास्तविकता इयमस्ति, यत् संस्कृतभाषा नास्ति कोऽपि प्राणी यः मृत्युं यायात्। सा संस्कृतभाषा तु सरस्वत्या मूर्तिमत्तनुः, यदवधि वाङ्मयरूपायाः सरस्वत्याः समुपासका वसुन्धरारत्नायमानाः जीविष्यन्ति न तावद् अस्य मृत्योः शङ्का। गुरूणमाशीर्वादः, गंगा, हिमालयः, पृथिवी, रामकथा च यावल्लोके स्थास्यति तावदेव संस्कृतभाषा किंवा राष्ट्रभाषासंस्कृतं स्वकीयं महन्माहात्म्यं प्रकटीकुर्वत् स्थास्यति भूतले। अतोऽस्माभिः एषा समृद्धा सर्वविधज्ञानविज्ञानसम्भारवती, चतुर्वर्गप्रदानसक्षमा संस्कृतभाषा आत्मश्रेयसे लोकस्थयसे च सर्वदा समाश्रयणीयेति। (संकलित प्र. र.)

❖❖❖❖❖❖❖❖❖❖❖❖❖❖❖

## व्यावहारिक-संस्कृत शुभाशयाः (शुभकामना)

**१. भूयात् सर्वं सुमंगलम्।**
**२. सफलतायै अभिनन्दनम्।**
**३. नव वर्षं शुभम् भूयात्।**
**४. नव वर्षं मंगलम् भूयात्।**
**५. नव वर्षं नव चैतन्यं ददातु।**
**६. जन्मदिनस्य शुभशयाः।**
**७. जन्मदिनस्य हार्दिक शुभेच्छाः।**
**८. भवतु मंगलम् जन्मदिनम्।**
**९. सुदिनं सुदिनं जन्मदिनम्**
**१०. जन्मदिवसस्य मंगलकामना।**
**११. दीपावल्याः शुभाशयाः**



१२. शुभास्ते पन्थानः।
१३. विवाहस्य वर्धापनदिनस्य अभिनन्दनानि।
१४. भवतः वैवाहिक वर्षदिवसं सुखमयं भूयात्।
१५. यशस्वी भवतु।
१६. जीवेत शरदः शतम्।
१७. विजयी भव सर्वदा।
१८. संस्कृत दिवसस्य हार्दिकी शुभैषणा।
१९. सर्वेभ्यः विश्वसंस्कृतदिवसस्य शुभाशयाः नैकानि वर्धापनानि च।
२०. सर्वेभ्य संस्कृत सप्ताहस्य अनन्तान्ता शुभकामना।

❖❖❖❖❖❖❖❖❖❖❖❖❖❖❖

## शब्दार्थाः

| | | | | | |
|---|---|---|---|---|---|
| १. | **अग्रजः** | बड़ा भाई | २४. | **परोक्षः** | पीछे |
| २. | **अनुजः** | छोटा भाई | २५. | **प्रत्यक्षः** | सामने |
| ३. | **अधिकः** | ज्यादा | २६. | **उष्णः** | गरम |
| ४. | **अज्ञः** | अज्ञानी | २७. | **शीतलः** | ठण्डा |
| ५. | **कटु** | झूठ | २८. | **निमर्लाम्** | स्वच्छ |
| ६. | **ज्येष्ठः** | बड़ा | २९. | **मलिनम्** | गन्दा |
| ७. | **कनिष्ठः** | छोटा | ३०. | **सुकरः** | सरल |
| ८. | **अथ** | प्रारम्भ | ३१. | **दुष्करः** | कठिन |
| ९. | **इति** | समाप्त | ३२. | **अश्वः** | घोड़ा |
| १०. | **चतुरः** | चालाक | ३३. | **गजः** | हाथी |
| ११. | **मूढः** | बुद्धू | ३४. | **महिषी** | भैंस |
| १२. | **उत्तमः** | अच्छा | ३५. | **वृकः** | भेडिया |
| १३. | **शुक्लः** | स्वच्छ (सफेद) | ३६. | **कूर्मः** | कछुआ |
| १४. | **कृष्णः** | काला | ३७. | **वृषभः** | बैल |
| १५. | **अनुरागः** | प्रेम | ३८. | **अजः** | बकरा |
| १६. | **चेतनः** | सजीव | ३९. | **धेनुः** | गाय |
| १७. | **ग्राह्य** | ग्रहण करना | ४०. | **उष्ट्रः** | ऊँट |
| १८. | **त्याज्य** | छोड़ना | ४१. | **गर्दभः** | गधा |
| १९. | **उन्नति** | बढ़ना | ४२. | **श्रृगालः** | गीदड़ |
| २०. | **अवनति** | घिरना | ४३. | **मृगः** | हिरण |
| २१. | **हर्षः** | प्रसन्न (खुश) | ४४. | **विडालः** | बिलाव |
| २२. | **विजयः** | जीतना | ४५. | **मूषकः** | चूहा |
| २३. | **पराजयः** | हारना | ४६. | **सिंहः (व्याघ्रः)** | शेर |

## विश्व: = संसार

| विभक्ति | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्र० | विश्व: | विश्वौ | विश्वे |
| द्वि० | विश्वम् | विश्वौ | विश्वान् |
| तृ० | विश्वेन | विश्वाभ्याम् | विश्वै: |
| च० | विश्वस्मै | विश्वाभ्याम् | विश्वेभ्य: |
| पं० | विश्वस्मात् | विश्वाभ्याम् | विश्वेभ्य: |
| ष० | विश्वस्य | विश्वयो: | विश्वेषाम् |
| स० | विश्वस्मिन् | विश्वयो: | विश्वेषु |
| सं० | हे विश्व | हे विश्वौ | हे विश्वे |

## उभ = दो, कति = कितने

| विभक्ति | द्विवचनम् | बहुवचनम् |
|---|---|---|
| प्र० | उभौ | कति |
| द्वि० | उभौ | कति |
| तृ० | उभाभ्याम् | कतिभि: |
| च० | उभाभ्याम् | कतिभ्य: |
| पं० | उभाभ्याम् | कतिभ्य: |
| ष० | उभयो: | कतीनाम् |
| स० | उभयो: | कतिषु |
| सं० | हे उभौ | हे कति |



## जरा = बुढ़ापा

| विभक्ति | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्र० | जरा | जरे<br>जरसौ | जरा:<br>जरस: |
| द्वि० | जराम्<br>जरसम् | जरे,<br>जरसौ | जरा:<br>जरस: |
| तृ० | जरया,<br>जरसा, | जराभ्याम् | जराभि: |
| च० | जरसे<br>जरायै | जराभ्याम् | जराभ्य: |
| पं० | जराया:<br>जरस: | जराभ्याम्<br>जरयो: | जराभ्य: |
| ष० | जराया:<br>जरस: | जरसो:<br>जरयो | जराणाम्<br>जरसाम् |
| स० | जरायाम्<br>जरसि | जरसो: | जरासु |
| सं० | हे जरे | हे जरे<br>हे जरसौ | हे जरा:<br>हे जरस: |

## मति = बुद्धि

| विभक्ति | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्र० | मतिः | मती | मतयः |
| द्वि० | मतिम् | मती | मतीः |
| तृ० | मत्या | मतिभ्याम् | मतिभिः |
| च० | मत्यै, मतये | मतिभ्याम् | मतिभ्यः |
| पं० | मत्याः, मतेः | मतिभ्याम् | मतीनाम् |
|  |  | मत्योः |  |
| ष० | मत्याः, मतेः | मत्योः | मतिषु |
| स० | मत्याम्, मतौ |  |  |
| सं० | हे मते | हे मती | हे मतयः |

❖❖❖❖❖❖❖❖

## धातु रूपम्

### नम्= नमस्कार करना, झुकना (परस्मैपदी)

### (लट् लकार)

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष– | नमति | नमतः | नमन्ति |
| मध्यमपुरुष– | नमसि | नमथः | नमथ |
| उत्तमपुरुष– | नमामि | नमावः | नमामः |

### (लिट् लकार)

| | | | |
|---|---|---|---|
| प्रथमपुरुष– | ननाम | नेमतुः | नेमुः |
| मध्यमपुरुष– | नेमिथ, ननन्थ | नेमथुः | नेम |
| उत्तमपुरुष– | ननाम, ननम | नेमिव | नेमिम |

### (लुट् लकार)

| | | | |
|---|---|---|---|
| प्रथमपुरुष– | नन्ता | नन्तारौ | नन्तारः |
| मध्यमपुरुष– | नन्तासि | नन्तास्थः | नन्तास्थ |
| उत्तमपुरुष– | नन्तास्मि | नन्तास्वः | नन्तास्मः |

### (लृट् लकार)

| | | | |
|---|---|---|---|
| प्रथमपुरुष– | नंस्यति | नंस्यतः | नंस्यन्ति |
| मध्यमपुरुष– | नंस्यसि | नंस्यथः | नंस्यथ |
| उत्तमपुरुष– | नंस्यामि | नंस्यावः | नंस्यामः |

**( लोट् लकार )**

| | | | |
|---|---|---|---|
| **प्रथमपुरुष**– | नमतु,तात् | नमताम् | नमन्तु |
| **मध्यमपुरुष**– | नम, तात् | नमतम् | नमत |
| **उत्तमपुरुष**– | नमानि | एधावहै | नमाम |

**( लङ् लकार )**

| | | | |
|---|---|---|---|
| **प्रथमपुरुष**– | अनमत् | अनमताम् | अनमन् |
| **मध्यमपरुष**– | अनमः | अनमतम् | अनमत |
| **उत्तमपुरुष**– | अनमम् | अनमाव | अनमाम |

## नी- ले जाना ( परस्मैपदी )

**( लट् लकार )**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुष**– | नयति | नयतः | नयन्ति |
| **मध्यमपुरुष**– | नयसि | नयथः | नयथ |
| **उत्तमपुरुष**– | नयामि | नयावः | नयामः |

**( लिट लकार )**

| | | | |
|---|---|---|---|
| **प्रथमपुरुष**– | निनाय | निन्यतुः | निन्युः |
| **मध्यमपुरुष**– | निनयिथ, निनेथ | निन्यथुः | निन्य |
| **उत्तमपुरुष**– | निनाय, निनय | निन्यिव | निन्यिम |

**( लुट् लकार )**

| | | | |
|---|---|---|---|
| **प्रथमपुरुष**– | नेता | नेतारौ | नेतारः |
| **मध्यमपरुष**– | नेतासि | नेतास्थः | नेतास्थ |
| **उत्तमपुरुष**– | नेतास्मि | नेतास्वः | नेतास्मः |

**( लृट् लकार )**

| | | | |
|---|---|---|---|
| **प्रथमपुरुष**– | नेष्यति | नेष्यतः | नेष्यन्ति |
| **मध्यमपरुष**– | नेष्यसि | नेष्यथः | नेष्यथ |
| **उत्तमपुरुष**– | नेष्यामि | नेष्यावः | नेष्यामः |

**( लोट् लकार )**

| | | | |
|---|---|---|---|
| **प्रथमपुरुष**– | नयतु,तात् | नयताम् | नयन्तु |
| **मध्यमपुरुष**– | नय, तात् | नयतम् | नयत |
| **उत्तमपुरुष**– | नयानि | नयाव | नयाम |

### ( लङ् लकार )

| | | | |
|---|---|---|---|
| **प्रथमपुरुष–** | अनयत् | अनयताम् | अनयन् |
| **मध्यमपरुष–** | अनयः | अनयतम् | अनयत |
| **उत्तमपुरुष–** | अनयम् | अनयाव | अनयाम |

## ( आत्मनपेदी )

### ( लट् लकार )

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुष–** | नयते | नयेते | नयन्ते |
| **मध्यमपरुष–** | नयसे | नयेथे | नयध्वे |
| **उत्तमपुरुष–** | नये | नयावहे | नयामहे |

### ( लिट लकार )

| | | | |
|---|---|---|---|
| **प्रथमपुरुष–** | निन्ये | निन्याते | निन्यिरे |
| **मध्यमपरुष–** | निन्यिषे | निन्याथे | निन्यिरे–ढ्वे |
| **उत्तमपुरुष–** | निन्ये | निन्यिवहे | निन्यिमहे |

### ( लुट् लकार )

| | | | |
|---|---|---|---|
| **प्रथमपुरुष–** | नेता | नेतारौ | नेतारः |
| **मध्यमपरुष–** | नेतासे | नेतासाथेः | नेताध्वे |
| **उत्तमपुरुष–** | नेताहे | नेतास्वहे | नेतास्महे |

### ( लृट् लकार )

| | | | |
|---|---|---|---|
| **प्रथमपुरुष–** | नेष्यते | नेष्येते | नेष्यन्ते |
| **मध्यमपरुष–** | नेष्यसे | नेष्येथे | नेष्यध्वे |
| **उत्तमपुरुष–** | नेष्ये | नेष्यावहे | नेष्यामहे |

### ( लोट् लकार )

| | | | |
|---|---|---|---|
| **प्रथमपुरुष–** | नयताम् | नयेताम् | नयन्ताम् |
| **मध्यमपरुष–** | नयस्व | नयेथाम् | नयध्वम् |
| **उत्तमपुरुष–** | नयै | नयावहै | नयामहै |

### ( लङ् लकार )

| | | | |
|---|---|---|---|
| **प्रथमपुरुष–** | अनयत् | अनयेताम् | अनयन्त |
| **मध्यमपरुष–** | अनयथाः | अनयेथाम् | अनयध्वम् |
| **उत्तमपुरुष–** | अनये | अनयावहि | अनयामहि |

# पच - पकाना ( परस्मैपदी )

### ( लट् लकार )

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपुरुष-** | पचति | पचतः | पचन्ति |
| **मध्यमपरुष-** | पचसि | पचथः | पचथ |
| **उत्तमपुरुष-** | पचामि | पचावः | पचामः |

### ( लिट लकार )

| | | | |
|---|---|---|---|
| **प्रथमपुरुष-** | पपाच | पेचतुः | पेचुः |
| **मध्यमपरुष-** | पेचिथ, पपक्थ | पेचथुः | पेच |
| **उत्तमपुरुष-** | पपाच,पपच | पेचिव | पेचिम |

### ( लुट् लकार )

| | | | |
|---|---|---|---|
| **प्रथमपुरुष-** | पक्ता | पक्तारौ | पक्तारः |
| **मध्यमपरुष-** | पक्तासि | पक्तास्थः | पक्तास्थ |
| **उत्तमपुरुष-** | पक्तास्मि | पक्तास्वः | पक्तास्मः |

### ( लृट् लकार )

| | | | |
|---|---|---|---|
| **प्रथमपुरुष-** | पक्ष्यति | पक्ष्यतः | पक्ष्यन्ति |
| **मध्यमपरुष-** | पक्ष्यसि | पक्ष्यथः | पक्ष्यथ |
| **उत्तमपुरुष-** | पक्ष्यामि | पक्ष्यावः | पक्ष्यामः |

### ( लोट् लकार )

| | | | |
|---|---|---|---|
| **प्रथमपुरुष-** | पचतु, तात् | पचताम् | पचन्तु |
| **मध्यमपरुष-** | पच, तात् | पचतम् | पचत |
| **उत्तमपुरुष-** | पचानि | पचाव | पचाम |

### ( लङ् लकार )

| | | | |
|---|---|---|---|
| **प्रथमपुरुष-** | अपचत् | अपचताम् | अपचन् |
| **मध्यमपरुष-** | अपचः | अपचतम् | अपचत |
| **उत्तमपुरुष-** | अपचम् | अपचाव | अपचाम |

## ( आत्मनपेदी )

### ( लट् लकार )

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपुरुष-** | पचेते | पचेते | पचन्ते |
| **मध्यमपरुष-** | पचसे | पचेथे | पचध्वे |
| **उत्तमपुरुष-** | पचे | पचावहे | पचामहे |

**( लिट लकार )**

| | | | |
|---|---|---|---|
| **प्रथमपुरुष–** | पेचे | पेचाते | पेचिरे |
| **मध्यमपरुष–** | पेचिषे | पेचाथे | पेचिध्वे |
| **उत्तमपुरुष–** | पेचे | पेचिवहे | पेचिमहे |

**( लुट् लकार )**

| | | | |
|---|---|---|---|
| **प्रथमपुरुष–** | पक्ता | पक्तारौ | पक्तार: |
| **मध्यमपरुष–** | पक्तासे | पक्तासाथे | पक्ताध्वे |
| **उत्तमपुरुष–** | पक्ताहे | पक्तास्वहे | पक्तास्महे |

**( लृट् लकार )**

| | | | |
|---|---|---|---|
| **प्रथमपुरुष–** | पक्ष्यते | पक्ष्येते | पक्ष्यन्ते |
| **मध्यमपरुष–** | पक्ष्यसे | पक्ष्येथे | पक्ष्यध्वे |
| **उत्तमपुरुष–** | पक्ष्ये | पक्ष्यावहे | पक्ष्यामहे |

**( लोट् लकार )**

| | | | |
|---|---|---|---|
| **प्रथमपुरुष–** | पचताम् | पचेताम् | पचन्ताम् |
| **मध्यमपरुष–** | पचस्व | पचेथाम् | पचध्वम् |
| **उत्तमपुरुष–** | पचै | पचावहै | पचामहै |

**( लङ् लकार )**

| | | | |
|---|---|---|---|
| **प्रथमपुरुष–** | अपचत | अपचेताम् | अपचन्त |
| **मध्यमपरुष–** | अपचथा: | अपचेथाम् | अपचध्वम् |
| **उत्तमपुरुष–** | अपचे | अपचावहि | अपचामहि |



**–सम्पादक सहायक:**
**दिल्ली संस्कृत अकादमी**

सुरुचिपूर्ण मासिक बाल संस्कृत पत्रिका

# "संस्कृत-चन्द्रिका"

नैतिक-मूल्यों के साथ-साथ

सम्पूर्ण देश के बाल-साहित्यकारों तथा नवोदित प्रतिभाओं

की लेखनी की संयुक्त प्रस्तुति

## "संस्कृत-चन्द्रिका"

( आई.एस.एस.एन.-2347–1565 )

संस्कृत भाषा के प्रचार-प्रसार हेतु प्रयत्नशील दिल्ली संस्कृत अकादमी, दिल्ली सरकार द्वारा सरल संस्कृत-भाषा में प्रकाशित एक ऐसी सुरुचिपूर्ण एवं ज्ञान-विज्ञान तथा नैतिक शिक्षा की बाल-मासिक पत्रिका जो प्रत्येक वर्ग के पाठक-समुदाय की अपेक्षा के अनुकूल पठनीय एवं संग्रहणीय है।

**मूल्यः- एक प्रति रु.२५/- मात्र, वार्षिक सदस्यता शुल्क रु. २५०/- मात्र**

सुरुचि सम्पन्न स्वस्थ सकारात्मक अभिव्यक्ति की संवाहिका

## "संस्कृत-चन्द्रिका"

के स्थायी अध्येता बनें।

आज ही अपना वार्षिक सदस्यता शुक्ल नगद, मनिआर्डर अथवा दिल्ली में भुनाये जाने योग्य बैंक ड्राफ्ट दिल्ली संस्कृत अकादमी के नाम से भिजवाकर सदस्यता प्राप्त करें। शुल्क मल्टी सिटी चैक द्वारा भी स्वीकार्य होगा।

पत्र व्यवहार का पता --

**सचिव/ सम्पादक, दिल्ली संस्कृत अकादमी, दिल्ली सरकार**

**प्लाट सं.-५ झण्डेवालान, करोलबाग, नई दिल्ली-११०००५**

**दूरभाष सं.- ०११-२३६३५५९२, २३६८१८३५**

RNI No.
DELSAN/2002/8921

प्रकाशक एवं मुद्रक सचिव, दिल्ली संस्कृत अकादमी के
स्वामित्व द्वारा मै. एस.डी.एम. प्रिन्टर एण्ड पैकर,
हरिनगर, घण्टा घर, नई दिल्ली–64
से मुद्रित और दिल्ली संस्कृत अकादमी, प्लाट सं.–5,
झण्डेवालान, करोलबाग, नई दिल्ली–110005 से प्रकाशित।